शोधितयोस्तयोरन्यतरज्ञानेन योरानयनमाह वर्णो भवेदिति ॥ तस्मिन्नेव वर्णाहतियोगराशौ व
र्णोद्धृते सति शोधितहेमसंख्या स्यात् ॥ अत्रोद्देशकं वसंततिलकापुगेनाह ॥ विष्वाकेरुद्रेति ॥ ते

शोधने त्रीणि॥ विश्वार्करुद्रदशवर्णसुवर्णमाषाः दिग्वेदलोचनयुगप्रमिताः क्रमेण॥ आवर्त्तिते
षु वद तेषु सुवर्णवर्णस्तूर्णं सुवर्णगणितज्ञ वणिग्भवेत्कः॥८५॥ ते शोधने परिचविंशति रुक्त
आगतो वर्ण नमः ९५ ११८ माषाः स्युः षोडशाङ्घ्रिवराणवर्णमितिस्त ताकिं चेच्छोधितं भवति षोडश हेमवर्णस्ते विंशतिः कति
तदा प्रभवति माषाः॥८६॥ भोः सुवर्णगणितज्ञ वणिक् ते षु चतुर्विधेषु सुवर्णेषु आवर्तितेषु सुवर्णः कोऽपि
वितेषु करस्तनां प्रापिते षिसर्षः कुः सुवर्णस्य वर्णो भवेत्तूर्णं वदेति तेषु केषु विश्वार्करुद्रदशवर्णे
तिश्रयोदशवर्णो दशमाषमितं द्वादशवर्णं चतुर्माषमितं एकादशवर्णं द्विमाषमितं दशवर्णं चतुर्मा
षमित्यादिषु॥ अथ ते विंशतिः प्रोक्तमाषाः शोधनेन यदि षोडशमाः स्युस्तदाङ्घ्रिवित्यय वर्णमितिः का सु
वर्णस्य वर्णमानं किमित्यर्थः अथ चेच्छोधितं हेम षोडशवर्णं भवति तदा ते विंशति माषाः कति भवंति
न्यासः १३ १० | १२ ४ | ११ २ | १० ४ क्रमात्सुवर्णस्य वर्णाहतयः १३०।४८।२२।४० असंयोगराशिः २४० अयं सुवर्णैक्ये
न २० भक्तः लब्धो मिश्रवर्णः १२ अथ पुनर्विंशतिमाषात्मकस्य सुवर्णस्य २० शोधनेन जाताः षोडश मा
॥२१॥ षाः १६ तेनि योगराशौ २४० भक्ते लब्धः शोधिते हेमवर्णः १५ अनेन पुनः राशौ २४० भक्ते लब्धं सुवर्णवर्ण
१५॥८७॥ अथाज्ञातसुवर्णवर्णार्थं सूत्रमाह स्वर्णैक्येति॥ स्वर्णैक्यनिघ्नाद्युतिजातवर्णात्सुवर्णत
द्वर्णवधैक्यहीनात्॥ अज्ञातवर्णाग्निजसंख्ययाप्तमज्ञातवर्णस्य भवेत्प्रमाणं॥८८॥ जातवर्णस्य
संख्याकं सुवर्णं हेमकं अग्निजं अष्टापदमिति पर्यायाः युतिजातवर्णो उद्दिष्टमिश्रवर्णस्तात्स्वर्णैक्यस्व
र्णतौल्यमानयोगस्तेन गुणितात् सुवर्णमानतद्वर्णवधैक्येनोनात् सकाशादज्ञातवर्णाग्निजस
ख्यया नज्ञातः वर्णो यस्य तदज्ञातवर्णं तच्च अग्निजं स्वर्णं तत्संख्यायाप्तं तदज्ञातवर्णस्य प्रमा
णं भवेत्॥ अत्रोद्देशकः॥ दशेशवर्णेति स्पष्टोऽर्थः॥ दशशवर्णा वसुनेत्रमाषा अज्ञातवर्णस्य
षडेतदैक्ये जातं सखेद्वादशकं सुवर्णमज्ञातवर्णस्य वद प्रमाणं॥८९॥ न्यासः १० ८ | ११ २ | ० ६ युतिजा
तवर्णः १२ अयं स्वर्णैक्येन १६ निघ्नः १९२ अयं सुवर्णपारतद्वर्णः १०।११ वधैः ८०।२२ ऐक्येन १०२ हीनः ९०
अज्ञातवर्णाग्निजसंख्याया ६ लब्धोऽज्ञातवर्णः १५ एवं न्यासः १० ८ | ११ २ | १५ ६ अस्मात्पूर्वसूत्रं रीत्या सु
वर्णवर्णाहतीत्यादिक्रिया जातो युतिजातवर्णः १२ अत्रोपपत्तिः॥ पूर्वसूत्रे तु अज्ञातयुतिवर्णस्य
ज्ञानार्थं सुवर्णस्य वर्णाहतियोगराशिः स्वर्णैक्यभक्त आसीदिदानीं युतिवर्णस्य ज्ञातत्वात्पूर्वसूत्रवै
लोम्येन युतिवर्णः स्वर्णैक्येन गुणितः स च सुवर्णवर्णाहतियोगराशितुल्यो भवति तस्माज्ज्ञातसुवर्ण
हति यदि शोधिते तर्हि अज्ञातवर्णसुवर्णाहतिरवशिष्यते सचेदग्निजसंख्यया भाज्यते तर्हि अत
वर्णो लभ्यत इत्युपपन्नं॥९९॥ अथ ज्ञातवर्णस्यानयनार्थं सूत्रं वृत्तैकेनाह॥ स्वर्णैक्यनिघ्न इति
स्वर्णैक्यनिघ्नो युतिजातवर्णः स्वर्णैर्घ्नवर्णैक्यवियोजितः स्यात्॥ अहेमवर्णाग्निजयोगवर्णविश्लेषभ
भक्तो विहिताग्निजं स्यात्॥१००॥ युतिजातवर्णः स्वर्णैक्येन गुणितः सुवर्णगुणितवर्णैक्येन विहीनः॥
भासौ नास्ति हेमस्वर्णो यस्य नामाज्ञातहेमवर्णः स चाग्निजयोगवर्णो युतिजातवर्णश्च तयोर्विश्लेषां
तरतेन भक्तो विहिताग्निजं स्यात् उदाहरतो॥ दशेन्दुवर्णाइति॥ दशेन्दुवर्णगुणचन्द्रमासाः॥ ॥गुण

विंशतिमाषा षोडशकस्य तेषां जातं पुनौ द्वादशकं सुवर्णं कति हते षोडशकस्य माषाः॥१०१॥गुणचंद्रमा
षाः द्वादशव र्णाः संति यथा षोडशकस्य वर्णास्यां किं चित्सुवर्णमस्तित ज्ञातं तेषां योगे द्वादशकं द्रम
मानं जातं तदो षोडशवर्णस्य स्वर्णस्य कति माषाः स्युरिति प्रश्नः एवंन्यासः १६ १४ १६ युतिवर्णाः १२अ
पं स्वर्णैक्येन ४ गुणितः स्वर्णघ्नवर्णैक्येन ४४ वियोजितः ४ अयमेव वर्णा १६ युतिवर्णयोर्विश्लेषेण ४
भक्तः लब्धमज्ञातहेममानं माषाः १ एवंन्यासः १६ १४ १६ ॥११॥अथोद्दिष्टस्वर्णयोरुभयोरपि तौ
ल्याज्ञाने सूत्रं वृत्तं शालिन्याह॥ साध्य इति॥साध्येनोनोऽनल्पवर्णो विधेयः साध्योवर्णः स्वल्पवर्णो
नितश्च॥ इष्टसुक्षुण्णशेषके स्वर्णमाने स्यातां स्वल्पानल्पयोर्वर्णयोस्ते॥२॥साध्यो वर्णो योगज वर्णस्त
म न्यवर्णोऽधिक वर्णो हीनो धाशेषं ग्राह्यं तत्पास्वल्पवर्णं साध्यवर्णाद्विशोध्य च शेषं ग्राह्यं एवं ते शे
॥३२॥ षेऽकल्पितेनेष्टेन गुणिते स्वल्पानल्प वर्णयोः स्वर्णमाने स्यातामित्यर्थः उदाहरणं॥हाटकेति स्पष्टं॥
हाटकगुटिके षोडशदशवर्णे यद्युतौ सखे जातं।द्वादशवर्णं स्वर्णं ब्रूहि तयोः स्वर्णयोर्माने॥३॥न्यासः
१६ १० वर्ण अत्र यः युतिवर्णः स एव साध्यवर्णः १२ अनेनाल्प अधिकवर्ण ऊ. १६ नितः मावं ४ अथ सा ॥३२
ध्यवर्णो स्वल्पवर्णो १० निते शषं २ एवं शेषे ४।२ एकेष्टेन १ गुणिते स्वल्पानल्पवर्णयोर्मानमाषाः १६ १० द्विके
ष्टेन १६ १० त्रिकेन वा १६ १० एवमनेकधा॥अत्रोपपत्तिः॥उद्दिष्टवर्णयोर्योगज वर्णोऽन्तरं हीनाधिकयु
दंतरमस्तीति ज्ञातव्येन साधिकादल्पे विशोधिते तत्रं हाटके तथा चोद्दिष्टवर्णयोर्मध्ये साध्य वर्णा

र्णापेक्षया यो बहुस्तस्मात्साध्यो विशोधिते स्तस्मा साध्य प्रसाधित्वो ल्पवर्णः स राव साध्याद्विशो
धितः एवं साध्याद्बहुवर्णो यावताधिकस्त दल्पवर्णस्य मानं तथा साध्य दल्पवर्णो यावान्न्यून
स्तद्बहुवर्णमानं यतो बहुवर्णः स्वल्पवर्णापेक्षया स्वर्णैकामितां तरेणाधिकोऽस्ति अथ सुवर्णवि
शोधिते योगराशावित्याद्विना योगज वर्णान यनेन स्वर्णमाने एवं स्वर्णानां गुणको भाजकौ च भवतः
तथा चेष्टगुणाभ्यां तयोपि गुणक भाजकाभ्यां फलं तुल्यमेव स्यादुपपन्नं॥३॥अथ छंदःशास्त्रोद्दे
शसिध्यर्थं करणसूत्रमनुष्टुप्पूर्वेनाह॥एकाद्येकोत्तरा अंका इति॥एकद्वित्र्यादीति मूखवरुन मे
रिति च॥आकाद्येकोत्तरा अंका व्यस्ता भाजाः क्रमस्थितैः॥परः पूर्वेण संगुणस्तत्परस्तेन तेन च
॥४॥एकद्वित्र्यादिभेदास्युरिदं साधारणं स्मृतं॥छंदश्चित्युत्तरे छंदस्युपयोगोस्य तद्विदां॥५॥मुखवा
रुनभा दासे खंडमेरौ च शिल्पके॥वैद्यके रसभेदीये तन्नोक्तं विस्तृते भयात्॥१०६॥एकादेरेक
उत्तरा ये षां ते एकाद्येकोत्तरः एकद्वित्रिचतुः पंचाद्या इत्यर्थः एवमुद्देशकालापमनुस्मृत्य यो तिमोकः
स्यात्तमादिं कृत्वा वामतो वद्व्याअंकास्थाप्याः ते च क्रमस्थापितैरेकाद्यैरधःस्थैः क्रमाद्भाज्याः आरोप
दोद्यिमः पूर्वेसं संगुणयस्तेन तत्परं संगुणयेत्तेन तत्परमिति यावदवसानं अयमर्थः आद्यौ द्वितीयं पूर्वेण
संगुणं तं साधस्थेन हरेणा भक्तालब्ध ध्वंते नतद्यिमं संगुणय स्वछेदेन भक्तायद्ध ध्वं तेन तत्परं संगु
णयं स्वछेदेन भक्त्वा मकुरेवं यावत्समाप्तिरित्यर्थः एकमेकद्वित्र्यादिभारा स्युः अथा स्यैपिपीपी गंदश्रीयं

"धे-संज्ञान माहृइरं साधारणं छंदः सर्वत्र मतं स्वरप्रस्तारगणितं स्मृतं॥ अथास्योपयोगं दर्शयति छं
दश्चित्सुत्तरे इति छंदः श्चितिश्छंदो विचितिः॥ छंदो ग्रंथाविदामुपयोगास्ति छंदांसीति ज्ञात्वाभिप्राये
णैकत्वं छंदो विचितिपूर्वकेषु ग्रंथेषु मया निरूपितस्यार्थः स्योपयोगोऽस्तीत्यर्थः॥ अथ न केवलमस्य
छंदः स्वेवोपयोगः किं तर्हि मूखावरुन अरोदोत थारवंड मेरौत थाशिल्पके रस्तमे दीयेवे घके पिअ
स्योपयोगोऽस्ति खंडमेरौ संगीतशास्त्रोक्त स्वरप्रस्तारे विधौ तालप्रस्तारं गांधर्वशास्त्रे एवमस्यास्या
नेक शास्त्रोपयोगित्वात्तत्तदुदाहरणानि यत्क्वानीति प्रासेन तत्परिहरं वक्ति॥ तन्नोक्तमिति॥ सू
त्रे कतिचिदभिप्रायास्तत्र प्रोक्ताः परं मत्सा कृथ बाकुलमिति संचित्य नोक्तं म॥ अत्र छंदः श्चिश्चिस्सुत्त
रे उदाहरणां प्रस्तारे इति॥ प्रस्तरे भित्रगायत्र्यासु पादव्यक्तयः कति एकादि गुरवश्चाशुक ष्पताम
पपकपयक॥१०॥ मो॥ मित्र गायत्र्याः प्रस्तारे चरणव्यक्तयः कति स्युस्तथा एकादि गुरवः एकगुरव
द्विगुरवस्त्रिगुरवइत्यादयः कति स्युरिति शीघ्रं पपकपरकष्पतां अथ गायत्री चरणषडक्षरस्याद्यस्या
नामेकादिषडंतानामंकानां तथाधः क्रमस्थानां च न्यासः ६ ५ ४ ३ २ १ प्रस्ताभाज्याः क्रमस्थितैरितु ॥३३॥
केः हरेणानेन भाज्योयं ६ भक्तः लब्धं तरेव ३ अनेनैव पूर्वांश्येन ६ द्वितीयः ५ गुणितः ३० निजाधस्थह
रेण २ भक्तः लब्धेनानेन १५ तदुत्तरोयं ४ गुणितः ६० स्वहरेण ३ लब्धं २० अनेन पूर्वाश्येन २० तदुत्तरेयं ३
गुणितः छेदः ६० हृते लब्धं १५ पूर्वाश्येनानेन तत्परोयं २ गुणितः ३० स्वछेदेन लब्धं ६ अनेन तत्परः षष्ठः १ गु

णितः ६ छेदः ६ हृते न लब्धः १ एवमनुक्रमाज्जाता न्यासः एकः ६ । १५ । २० । १५ । ६ । १ तत्रैकगुरवः षट् ६ द्वि
गुरुव्यक्तयः १५ त्रिगुरुव्यक्तयः २० चतुर्गुरुव्यक्तयः १५ गुरुपंचकव्यक्तयः ६ षड्गुरवश्च १ एकः सर्वत्र लघुः सो
स एवमेषामैक्ये संपादव्यक्तयो जाताः ६४ एवं चतुश्चरणाक्षरणाक्षर संख्याकाः यथोक्तानि स्युस्ता न्यसैकी हन्यज्जा
ना गायत्रीवृत्त संख्या १६७७७२१६ अथ समग्रस्यापि गायत्रीवृत्तस्य एकादि गुरुविनयनार्थं न्यासः॥ ॥ ॥ ॥

[illegible]	२४	२३	२२	२१	२०	१९	१८	१७	१६	१५	१४	१३	१२	११	१०	९	८	७	६	५	४	३	२	१
[illegible]	१	२	३	४	५	६	७	८	९	१०	११	१२	१३	१४	१५	१६	१७	१८	१९	२०	२१	२२	२३	२४
१	२४	[illegible]	[illegible]	[illegible]	[illegible]	[illegible]	[illegible]	[illegible]	[illegible]	[illegible]	[illegible]	[illegible]	[illegible]	[illegible]	[illegible]	[illegible]	[illegible]	[illegible]	[illegible]	[illegible]	[illegible]	[illegible]	२४	१

अत्र चार्येणोक्तं यन्नाम्ने फीकृत तस्यायमर्थः सर्वेषामादौ एकः सर्वगुरुरिति प्रथमरूपं तु अत
त्तेनेव पुनः सर्वेषामंते एकः सर्वलघुरिति हेतोः एवं जाता गायत्रीवृत्तसंख्यासा न्येयं १६७७७२१६ एवमुक्ष्तिपर्यंतं छं
दसां व्यक्ति व्यक्तिमिति ज्ञानं अथोत्कृतिर्नामषड्विंशत्यक्षरात्मकचरणोपलक्षितं वृत्तमित्यर्थः तथा चोक्तं पिंगलमतमाश्रि
त्य केदारभट्टे वृत्तरत्नाकरे यथा तथाहि आरभ्यैकाक्षरात्पादादेकैकाक्षरवर्द्धितः पृथक्छंदो भवेत्पादैर्यावत्षड्विंशतिं गतं
१ अथ तदभिधाः उक्तात्युक्ता तथा मध्या ३ प्रतिष्ठा ४ न्यासु पूर्विका ५ गायत्र्युष्णिक् ७ अनुष्टुप् च ८ बृहती ९ पंक्तिरेव च
१० । १२ जगती १२ चैव तथातिजगती मता १३॥ शक्करी १४ स्यातिपूर्वा १५ स्यादष्टि १६ स्यष्टि १७ ततः स्मृते ३ धृतिः १८ श्चा
तिधृति १९ श्चैव कृतिः २० प्रकृति २१ राकृतिः २२ विकृतिः २३ संस्कृति २४ श्चैव तथाति कृति २५ रुत्कृति २६ ४ अथा त्रैव
प्रस्तारो नष्टमुद्दिष्टमेकद्व्यादिलघुक्रिया संख्या चैवाध्वयोगश्च षडेते प्रत्ययाः स्मृताः अथ तत्रैव स्तारः

69
2006
34

पादेसर्वगुरावाद्यात्लघुंन्यस्यगुरोरधः यथोपरितथाशेषंभूयः कुर्यादमुंविधिं १ ऊनेदद्याद्गुरूनेवंयावत्सर्वलघुर्भवेत् प्रस्तारोयंसमाख्यातश्छंदोविचितिवेदिभिः २ अथास्यार्थः प्रोक्तछंदश्चरणेअक्षरमितानांगुरूणांयाश्रेणीतस्याःप्रथमरूपं अथाद्योगुरुःतदधोलघुं विन्यस्याग्रेगुरवःस्थाप्याः तद्द्वितीयंरूपंभवति अत्रगुरुलघुसंज्ञास्थापनरीतिस्तत्रैवोक्ताथो द्यंतानस्त्वसौगवक्रोज्ञेयोयोमात्रिकोलजुरितिगुनामगुरुर्वक्रःज्ञेयः अन्यमात्रकः मात्रैकोयलाक्षितलना मलघुः ऋजुश्चपक्कनयोपलाक्षितोगुरुर्द्विमात्रश्चऋजुतयोपलक्षितोमोलघुरेकमात्रइत्यर्थः एवंकृतस्याग्रिमा मपूर्वलघुस्थानात् अधोगुरुंन्यस्यशेषंयथोपरितथैवकार्यंएवंपौनःपौन्यादावत्सर्वलघुस्तावत्सरूपंभवतियाव वत्सर्वलघुरित्यनेनकृतप्रस्तारपंक्तिनाथाद्युपलक्षणमपिसूचितंएवंवस्तुतोगायत्र्याःपादेषडक्षराणिसंत तः प्रथमरूपंषड्गुर्वात्मकंप्रकृतौविन्यस्यअग्रेद्वितीयादीनांरूपाणांन्यायेनानेनरचयेत्प्रस्तारः तस्यायंन्यासः

१	ऽऽऽऽऽऽ	९	ऽऽऽ।ऽऽ	१७	ऽऽऽऽ।ऽ	२५	ऽऽऽ।।ऽ	३३	ऽऽऽऽऽ।	४१	ऽऽऽ।ऽ।	४९	ऽऽऽऽ।।
२	।ऽऽऽऽऽ	१०	।ऽऽ।ऽऽ	१८	।ऽऽऽ।ऽ	२६	।ऽऽ।।ऽ	३४	।ऽऽऽऽ।	४२	।ऽऽ।ऽ।	५०	।ऽऽऽ।।
३	ऽ।ऽऽऽऽ	११	ऽ।ऽ।ऽऽ	१९	ऽ।ऽऽ।ऽ	२७	ऽ।ऽ।।ऽ	३५	ऽ।ऽऽऽ।	४३	ऽ।ऽ।ऽ।	५१	ऽ।ऽऽ।।
४	।।ऽऽऽऽ	१२	।।ऽ।ऽऽ	२०	।।ऽऽ।ऽ	२८	।।ऽ।।ऽ	३६	।।ऽऽऽ।	४४	।।ऽ।ऽ।	५२	।।ऽऽ।।
५	ऽऽ।ऽऽऽ	१३	ऽऽ।।ऽऽ	२१	ऽऽ।ऽ।ऽ	२९	ऽऽ।।।ऽ	३७	ऽऽ।ऽऽ।	४५	ऽऽ।।ऽ।	५३	ऽऽ।ऽ।।
६	।ऽ।ऽऽऽ	१४	।ऽ।।ऽऽ	२२	।ऽ।ऽ।ऽ	३०	।ऽ।।।ऽ	३८	।ऽ।ऽऽ।	४६	।ऽ।।ऽ।	५४	।ऽ।ऽ।।
७	ऽ।।ऽऽऽ	१५	ऽ।।।ऽऽ	२३	ऽ।।ऽ।ऽ	३१	ऽ।।।।ऽ	३९	ऽ।।ऽऽ।	४७	ऽ।।।ऽ।	५५	ऽ।।ऽ।।
८	।।।ऽऽऽ	१६	।।।।ऽऽ	२४	।।।ऽ।ऽ	३२	।।।।।ऽ	४०	।।।ऽऽ।	४८	।।।।ऽ।	५६	।।।ऽ।।

५७	ऽऽऽ।।।
५८	।ऽऽ।।।
५९	ऽ।ऽ।।।
६०	।।ऽ।।।
६१	ऽऽ।।।।
६२	।ऽ।।।।
६३	ऽ।।।।।
६४	।।।।।।

इतिप्रस्तारः अथैषांरूपाणांनष्टमुपस्थितिपर्यंतप्रसंगेनछाद्द्मपृच्छ्यतेउद्दिष्टेनाप स्विष्टयागुरुलघ्वात्मकंरूपंप्रकल्प्यतन्निपभिर्तभवष्यतीपृष्टेयत्नदुद्दिष्टेकथ्यते अथरूपेअज्ञातेएतावन्मितेरूपंकीदृशंभवतीतिपृष्टेयत्नन्नष्टमिति शब्द्य तेअथनष्टसाधनक्रमः नष्टस्ययोभवेदंकस्तस्यार्द्धेर्द्धेसमेचलः विष मेचैकमाधायतस्यार्द्धेर्द्धेगुरुर्भवेत् ४ अस्यार्थः योहिनष्टांकः स्यात्तस्या र्द्धेर्द्धेकृतेसतियदिसमांकःस्यात्तदालघुःस्थाप्यः चशब्दात्स्वभावतोपिसमं केलघुरेवस्यात् विषमेतुएकमाधायतामत्रिक्षिप्यतदर्द्धेर्द्धेकृतेसतिगुरुर्भवेत्अत्रापिचश ब्दात्स्वभावतोविषमेगुरुःस्यात्इत्यर्थः यथात्रपंचत्रिंशत्तमं३५रूपंकीदृक्भाविष्यतीतीपृष्टेपंचत्रिंशत्तिमःस्वभावाद्विषमोंकः अतएकोगुरुःस्थाप्यः ततःपंचत्रिंशतेरर्द्धेनसं भवत्यतःएकं१क्षिप्त्वा३६ अर्द्धे१८समसंख्यअतोद्वितीयस्थानेलघुंविन्यस्य अस्या१८ अ र्द्धे९अस्यविषमत्वात्तृतीयस्थानेगुरुःस्थापितः नवानां९मर्द्धेनसंभवत्यतएकंक्षिप्त्वा१०अ र्द्धे५अस्यापिविषमात्चतुर्थस्थानेगुरुर्न्यस्तः अस्यार्द्धेनसंभवत्यतएकंक्षिप्त्वा६ अर्द्धेस्या३

विषमत्वात्प्रथमस्थाने गुरुः स्थापितः अत्रापि एकं क्षिप्त्वा ४ अर्द्धिते २ अस्य समत्वात् षष्ठस्थाने लघुर्न्य
स्तः एवं कृते जातमिदं पंचत्रिंशतिप्रस्तारस्य रूपमिदं ऽ।ऽऽऽ। इति नष्टं अथोद्दिष्टमापितन्त्रेणोक्तं
उद्दिष्टद्विगुणानाद्यादुपर्यंकान् समालिखेत् लघुस्थाने तु ये त्वंकास्तैः सैकैर्मिश्रितैर्भवेत् अस्या
र्थः परिकेतच्छिष्टमेतादृक्गुरुलघ्वात्मकं रूपं कियत्संख्यं भवतीति तदाद्यात् उपरि द्विगुणांकान् लिखे
त् तत्र ये लघुस्थानस्था अंकास्तैर्मिश्रितैरेकयुतैश्च उद्दिष्टं रूपं भवेत् यथास्मिन् कल्पितमिदं रूपं यस्य
आदौ गुरुरेकः ततो गुरुद्वयं ऽऽ ततः पुनः लघुः ततो गुरुः पुनरंते लघुः ।ऽऽ।ऽ। इदं कियत्संख्यं स्या
दिति प्रश्ने षट्सु स्थानेषु द्विगुणांकान् संस्थाप्य तदधः प्रस्तार रूपं ।ऽऽ।ऽ। स्थाप्यं ना

सः	१	२	४	८	१६	३२
मि	।	ऽ	ऽ	।	ऽ	।

अत्र लघुस्थानीया अंकाः १।८।३२ एषां योगः ४१ सैकः ४२ जातमिदं रूपं द्विचत्वारिंशत्तमस्तीति उद्दिष्टं एवं सर्वत्रेति दिक् सर्वेषां छंदसां
प्रस्तार आनेयस्तस्य पर्व उक्तास्युक्तेति ग्रंथबहुत्वभयादिङ्मात्रमेव निरूप्यते तत्र उक्ता नामा
मेकाक्षरपदं छंदः तत्रैकं गुरुरूपं लघुरूपं स्यात् जातं रूपद्वयं ऽ। अत्युक्ता नाम द्व्यक्षरपादं छंदः तत्र द्विगुरु मि
ताद्याद्यपंक्तिविन्यासप्रस्तारक्रमाज्जातं रूपचतुष्टयं ४ ऽऽ ।ऽ ऽ। ।। एते रिति गणा इति छंदः शास्त्रे प्र
सिद्धं एवं मध्या नाम त्र्यक्षरत्र्यात्मके कपादछंदः विशेषः तत्रापि प्राग्वत् प्रस्तारविधिना ३५

गुरुत्रयात्मकाद्यपंक्तेः सकाशाज्जातान्यष्टरूपाणि ऽऽऽ ।ऽऽ ऽ।ऽ ।।ऽ ऽऽ। ।ऽ। ऽ।। ।।। एते कामगणाख्या आद्यरूपाणि मयरसतजभनाख्याः अष्टौ वर्णग
णा अपि भवंति एवं प्रतिष्ठा नाम चतुरक्षरात्मके कपादछंदः विशेषः तत्रापि प्राग्वत् प्रस्तारविधिना चतुर्गुर्वाद्यपं
क्तेः सकाशाज्जातानि षोडशरूपाणि जातानि चै तानि ऽऽऽऽ ।ऽऽऽ ऽ।ऽऽ ।।ऽऽ ऽऽ।ऽ ।ऽ।ऽ ऽ।।ऽ ।।।ऽ ऽऽऽ। ।ऽऽ। ऽ।ऽ। ।।ऽ। ऽऽ।। ।ऽ।। ऽ।।। ।।।। एतेषां गणाख्या भवंति येषां संगीत एवोपसंग
तत्वानुपयोगः तेषां सर्वेषामपि सत्वमिति विस्तरेण लेख यस्तु प्रस्तारः कर्तव्यस्तदक्षरमितान् प्रमोपं क्तो विलिख्य
तस्य काशात् गुरुलघ्वप्रस्तार आनेयः तत्र एका ऽऽ तरां अंकाद् मादीना या आनीता एकाद्यादिगुरुव्यक्तय
स्ताः स्फुटतराः विलोकनीयाः ननु कपं विलोकनीयास्ता आत यथात्र एकगुरवः षट् संति एकगुरवः नामपृत्रे को
गुरवः पंच लघवः एतादृशानि रूपाणि अस्मिन् गायत्रीच रणस्य विस्तार्यमाणे प्रस्तारे सातिषड्वस्तुरित्यर्थः
एवं द्विगुरवः पंचदश यत्र द्वौ गुरू चत्वारो लघवः एतादृशा णि रूपाणि समग्रे चतुःषष्टि ६४ पंक्ति प्रस्तारे पंच
दशैव एवं त्रिगुर्वादि अथात्रैककलद्विकलचतुष्कलादिस स्तारेषु कानि सर्वगुरूणि रूपाणि कान्येकगुरूणि
कानि द्विगुर्वादीनीति ज्ञातव्ये वा कति सर्वगुरवः कत्येकगुरवः कति द्विगुरवः कति त्रिगुर्वादय इति बुभुत्सायां व
र्णध्वजां जरिति तत् ज्ञानार्थं क्रमः यथोक्तं पिंगले एषा वर्ण पताका कीर्तिं पताकाति राज्जस्येति एकद्वाव था
लारस्तनोः विति वर्द्धनात् पूर्वं परेण संयुज्य तदधोलेख्य यद्बुधः ॥७॥ अंतिमां काविधिनैवलंघयेद्य त्वकुत्र
चित्॥ एकत्रलिखितं प्राङ्नुः पुनरंत्यत्र नोल्लिखेत्॥ अत्र स्फुटोऽर्थः तथाप्युदाहरणे साम्यग्दर्शयिष्ये प्रथम
स्थाने सर्वगुरवः द्वितीयस्थाने विवक्षित सर्वगुरुमध्ये एकं न्यूनं कृत्वा तावद्रूपभेदस्थानानि एवं तृतीयादिपं
क्तिषु एकैकगुरुन्यूनप्रस्तारस्थानानि यद्या प्रथमः सर्वगुरुर्द्वितीयपंक्तावेकलघुस्थानानि तृतीयपंक्तौ द्विलघु
स्थानानि इत्यादि ज्ञेयं॥ अथोदाहरणप्रकाशः १ २ अस्यादिकल्यत्वादेकस्थानस्य एकगुरुः द्वितीयस्य एकलघुरिति

कल्पि

द्विचतुर्योगे षट्ंअंकास्ते चतुरधः ३

एतावतैव सिद्धिः मध्याक्षरे यथा  अथैकांकद्व्यंकयोः संयोजनेन त्र्यंकस्तु स च अंकाधो लेख्यः तस्य चतुर्विंशत्या ता
वतैव सिद्धिः प्रथमस्थानस्य एकः सर्वगुरुः द्वितीयतृतीयस्थानस्थौ एकगुरू एकलघू चतुर्थस्थानस्थः सर्वल
घुरिति मध्याक्षरे यथा अथ एकचतुरंकयोगेन पंचांकस्तु अंकाधः एकचतुरंकयोगेन पंचांकस्तु अंकाधः पंचांके
योजनेन कार्यं नवमभे दाभावत्तेन अंकस्य चतुरंकसंस्पर्शो समषडधनिवरणाः चतुरक्षरे पताका ॥ ॥

अथैकंद्व्यंपोसहत्रयंतद्व्यंकाधः पुनरेकं चतुर्भिः सहपंचसे काधः एकाष्टयोगेन नवं
धः द्व्यष्टयोगे दशांकः षडधः द्विषोडशयोगो न कार्यः त्रिचतुर्योगे षट्ंअंकास्ते चतुरधः सप्ता
दशाधः त्र्यष्टयोगे एकादशांकः सप्ताधः त्रिषोडशयोगेन कार्यं अंतिमत्वात् पंच चतुर्योगे नवां
ए ३ लिखित्वा नवेरव्यः पंचाष्टयोगे त्रयोदश एकादशाधः चतुरष्टयोगे द्वादशाधः चतुःषोडशयो
नकार्यः षडष्टयोगे चतुर्दशद्वादशाधः दशाष्टयोगो न कार्यः अष्टादशभेदाभावात् समाष्टयोगे
पंचदश चतुर्दशाधः अत्र प्रथमस्थाने सर्वगुरुः द्वितीयपंक्तौ द्वित्रिपंचनवस्थाने एकलघवस्त्रिगुरवः
श्चवान्याः ॥ चतुःषट्दशसप्तैकादशत्रयोदशप्रमरूपेषु द्विलघवो द्विगुरवश्चवेद्याः ॥ अष्टद्वादशे चतुर्दशपंच
दशस्थानीयरूपेषु त्रिलघव एकगुरवश्च षोडशस्थाने सर्वलघुरिति योजना ॥ अथैवं नो चेद् द्वामरव्या एकगुरवो द्वि
गुरवास्त्रिगुरवश्चाध्येया यथा प्रस्तारांते षोडशमं रूपं तत्सर्वलघु ततोऽष्टद्वादशचतुर्दशपंचदशमरूपा
णि एकगुरव इति ततो चतुःषट् दिगादि द्विगुरव इति पूर्वप्रोक्तमपि वेशघ्याधर्मियं पुनरुक्तिः अथैवमे
वसर्वत्रसमूहनीयं ॥ अथ प्रागुक्तवत्सु प्रतिष्ठाछंदसः पंचाक्षरपादोपलक्षितस्य पताकायं ॥ ३

अथैवं मेगाय त्रीत्र स्मेणे स्तारे कगुरवः इतिद्विगुरवस्ते के इति तूर्णे पस्थिमेस्ततेयषद्गुण
अथैकघादिगुरुस्थानं पूर्ववद्वेद्यं एवं सर्वत्र षोडशपंचप्र
घादिगुरुस्थानं तु पूर्ववद्वेद्यं यथास्य पंक्तिनोवामुरव्या एके
यथासो पंक्तिः ३२।४८।५६।६०।६३ एकगुर्वात्मिका ततो
नानि इमानि २४।४०।४४।५२।३०।४६।५४।५८।३१।४७।
तोद्व्यं काधिक त्रिगुरुपंक्तिः ततश्चतुरंकाधश्चतुर्गुरवः द्व्यंका
षट्गुरुः एवं लघुसंज्ञा जिज्ञासा यां द्व्यंकाधः पंक्तौ एकलघवः च
वः अष्टाधस्त्रिलघव इत्यादि पताका एवं छंदः प्रस्तार मेरौ तु ॥ यथो
रवकुहूः कुरु आइअंत पढमं ॥ सिरदुइअंके अवरुभरु सुइ मेरुणित्ते
क्षाकाद्वकोष्ठकाद् कुरु आद्यंतयोः प्रथमांकं कुरु शीर्षद्वयं अपरं द्वर
कोधुनात संसंगेना यापानु कापिरवं इमेरु प्रस्थासंक्षेपात्रिरुप्य
प्रकुमध्यमग्रामाग्राश्चतुर्दशमूर्छनासंति तास्तु प्रत्येकं एकस्वरादि ता
संवत्मेरोः प्रवृत्तिः तदुक्तं संगीतरत्नाकरे क्रमान्स्वराणां सप्तानामा
तन्नामदव्येनाः सप्तसप्तच तथा षट्कानेवाद्गिसमानोतानानत्र्यांगिरव
केपरेपरे १ एकस्वरादिसंरव्यास्या तत्क्रमेण प्रतिमूर्छनमिति अपिच
पत्कपः तास्त्वाद्या यामाद्यन्नोह्लेनिरवेदं कूपरेषु स्वामित्यादि क्रमेणन्यासः
गांसांकमिश्रणात् एकस्वरादितानानां संख्यास्तु जायते क्रमात् इत्यादि

[left column:]
पताका
आप्येक
द्विगुरव
गुरुस्था
॥
चतुरवः एक
धः अन्यांद्विल
गलेअरवसंर
अस्यार्थः अक्षास
पसमेरुनिः शंकस्यात् मेरुचो
तेत्रस्वरवरोहावरोहौसप्तनोः
नानासंरव्याप्रस्तारमस्यार्थ
रोहश्चावरोहणं मूर्छनेत्युच्य
तक्रमात् हनेपूर्वेण पूर्वेणतेषु चा
सासाद्येकोनकोष्ठानां मध्येप्रसप्त
तथाच तानस्वरमितोर्ध्वाधःपंक्ति

नोदाधः	१	२	३	४	५	६	७
रंतानसं	स	रि	ग	म	प	ध	नि
लप्रस्तारे	१	०	०	०	०	०	०
परि मात्क	१	२	३	२४	१२	०	७२०
न्य २ अस्याधः		४	१२	४८	२	४०	१४४०
रुलध्वात्मकं। धिरिव			१८	७२	३६	०	२१६०
स्पेन्यसेन अत्रात्प्रशाद्देन				९६	४८	०	२८८०
पमर्थः पत्ताद्योलघुर्महान्न					६००	०	३६००
ज्ञुतेमहतिगुरुरन्त्यैः स्पारेवं न्यस्ते							४३२०

१	१					
१	२	१				
१	३	३	१			
१	४	६	४	१		
१	५	१०	१०	५	१	
१	६	१५	२०	१५	६	१

पंक्तिस्थितानामंकानां योगे क्रियमाणे ॥ ॥ १॥ श्री॥ वर्णमेरुरयं प्रतिस्व
स्या स १ रि १ ग म २६ प २४० नि ५२० एवं सर्वतान संख्या ५०४० ता
पि चोक्तं तस्मात्प्रमाद्या महतो धः सखि स्थाछुशं यथो
नाद्याम संख्यास्तु संभवे मह तो लिखे
स्याभिपतं मंक ध नतानं गु
त्यातदेव येक्को द्या महतो
द्रुत लघु गुरव उ पं ते भ
नो धः स्थान्नपेक्षया द्रुतो रचनीयः एवं गुरौ महति लघुरन्त्य तया
यथोपरि तथा शेषं न्यसेत् ऊने ऊनस्थाने तु यथा संभवं गुरुलघु न्य
सादुताः सा न्यसेत् यावत् सर्वे द्रुता न भवन्ति तावत् कार्यं यथा एकताली तालेए को द्रुतोस्ति तस्य प्रस्तारे एकमेव रू
पं तथा द्विद्रुत प्रस्तारे रूपद्वयं ।०।०। तथा द्रुतो स्मिन् ।०। आद्या महतो न्ये स्यादि ।पादि नाजातं रूपत्रयं ०। यथा यांत्र
ताले लघुद्वयमस्ति तस्य चत्वारो द्रुताः भवन्ति तेषां प्रस्तारे जातानि षड् रूपाणि ॥ ऽ एवं पंचद्रुत १० ००० मास्ते जाता
निनव रूपाणि ०ऽ ०॥ एवमेतेषां दृशीमार्गेतालनां प्रस्तारविधिः कार्यः इत्यर्थ ॥ ००१ मातिविस्ता ॥ रेण अथा
चार्यः शिल्पेन १०१ थारसभेदाय वैद्यक प्युदाहरणमाह एकद्विव्यादि मुरव्य ०१० वतनेति एकद्वित्र्यादि मुरव्या
वहनपरिमिते ००१ इति मे भूमिभर्तुः रम्ये रम्य प्रमुखे चतुर विरचिते न श्लक्ष्ण १०० शाला विशाले एकद्वित्र्या
दियुक्ता मधुर ऽ। ११० कटुकषायाम्लक क्षार तिक्तैरेकस्मिन् षड्रसैः स्युर्गणक कतिवद व्यंजने व्यक्तिभेदाः १०८
भोः गणक १००० ०००० भूमिभर्तुः नृपस्य चित्राणां अष्टमुखे युक्ते चतुरस्त्र धात्रि निर्मिते सुतरां चतुरेण सूदशाला

कामिर्विविरचिते विपुले श्लक्ष्णशालाभिर्विशाले एतन्मे षड्रसे एकद्वित्र्यादि मुख्या वहन परिमिति प्रमाण वद
मुरव्या वहनात्सलिंदानीति केचित् वस्तु वस्तु भन्तु क्षरेतौ राजगृहादौ या मुखं चारार्थं भित्तिच्छिद्राणी मुखानि स्ते वेदा
इत्यर्थः अत्राद्य मुखे ह परे काद्य पर्यं तानां अस्तानां क्रमगता नां च न्यासः ८/१ ७/२ ६/३ ५/४ ४/५ ३/६ २/७ १/८ ते विधाय न्यस्ता
भाज्या क्रमस्थिते ८ परः पूर्वेन संगुण्येति प्राग्वत् यथाष्टकेवेन १ भक्ते ८ तेः सप्त ७ गुणिता ५६ छेदी भूत द्वाभ्यामाप्ते
२८ पुनः पूर्व राशिणानेन २८ परं संगुण्य १६८ स्वछेदेन ३ लब्धः पूर्वराशिः अनेन परं ५ संगुण्य २८० छेदे ४ दाप्तं ७० एवं
जानां मुरव्य वहन व्यक्तीनां क्रमेण न्यासः ८/१ २८/२ ५६/३ ७०/४ ५६/५ २८/६ ८/७ १/८ अत्रापि अष्ट गुद्यात्मकं प्रथम रूपं प्रथम
कौ नि न्यस्य पादे सर्वं गुरावितादिशाभ्य प्रस्तार विधिना प्रस्तार आनेयः एवं तु अनन्तत न प्रकार त्वात् ग्रंथ
विस्तार भयाः चे नास्माभिर्लिख्यते अथो न राद्वैन सरस भेदोदाहरणं ॥ एकद्वित्र्यादि युक्तेति । हे प्रभो गणक एक
स्मिन्न्याके व्यंजने मधुरादिकैः षड्रसैः एकद्व्यादि युक्ताः कति व्यक्ति भेदा स्तान् वदेति प्रश्ने न्यासः ६/१ ५/२ ४/३ ३/४ २/५ १/६
अत्रापि प्राग्वदेव जाता अत्र एकस्मिन् रसा विशेषे मधुरादीनां रसानां योगे व्यक्तिभेदाः ६।१५।२०।१५।६।१॥ ॥ इति श्री
सिद्धान्त शिरोगणित लीलावत्युदाहरणे श्रीमद्दैवज्ञ निकरा भिमत धनेश्वर कृते लीलावती भूषणे मिश्र अध्यायः ॥ ॥ अ
थ श्रेढीव्यवहारे रुणाम्स्य वृत्तेनाह सैकपदेति सैकपदघ्न पदार्द्धमथैकाद्यंक युतिः किल संकलिताख्या
साद्वियुतेन पदेन विनिघ्नी स्यात्त्रिहृता खलु संकलितैक्यं १०९ सैकपदघ्न पदस्यार्द्धं एकाद्यंक युतिः स
कलिताख्या किल स्यादि ति अन्वयः एकेन सहितं सैकं च तत्पदं च तेन घ्न गुणितं च तत्पदं च तस्यार्द्धं नाचे सैकं
पदघ्नं च तत्पदार्द्धं चेति अत्र पदशब्देन एकद्व्यादिनामंकानां कायोऽभीष्टः यस्य संकलितं विधीयते सो इत्य
र्थः तदेव पदं तस्यार्द्धं विधाय सैक पदघ्नं कार्यं वा सैक पदगुणितस्य पदस्यार्द्धं कार्यमिति अथ संकलितस्या

पिनामैकादियोगस्यापिसंकलितमात्रसेति मासंकलितास्यायुतिश्चाभ्यांयुतेनपदेप्राहतेनगुणानीयातदनुत्रिभि
र्भक्तासतीसंकलितैक्यंस्यात् अत्रोदाहरणमनुष्टुभात एकादीनामितिस्पष्टं एकादीनांनवानांनांपृथक्सं
कलितानिमे तेषांसंकलितैक्यंचप्रचक्ष्वगणकद्रुतं १० न्यासः १।२।३।४।५।६।७।८।९ अत्रप्रथमेचपदं १सैकं
क २अनेनपदं १गुणितं २अर्द्धितं १जातंतस्यसंकलितं १एवंपदमिहद्वि २सैकपदेन ३गुणितं ६अर्द्धितं ३द्वयोः संकलितं ३
अथपदंत्रयं ३सैकं ४अनेनपदंगुणितं १२दलितंजातंत्रयाणांसंकलितं ६अथपदं ४अस्यार्द्धं २एतत्सैकपदेन ५
गुणितं १० तदाजातंचतुर्णांसंकलितं १० एवंसर्वेषांसंकलितानि १।३।६।१०।१५।२१।२८।३६।४५ अथवापदं ५
अस्यार्द्धं ५/२ इदंसैकपदेन ६गुणितं ३० छेदहृतंपंचानांसंकलितंजातंतदेव १५ अथवासैकपदघ्नपदार्द्धमितिपा
ठःनचेयुक्तंतरकार्यं एकपदघ्नपदार्द्धेस्यात् एकाद्येकयुतिः एकशब्दस्यकेवलंनार्थः एकानामकेतत्वंपनसपंचने
नगुणितंचतत्परंतस्यार्द्धितमित्यर्थः यथेष्टंपदं ५अनेनपदस्यार्द्धं ३गुणितंजातंतदेव १५ अथसंकलितस्या
योगानयनार्थंन्यासः १।३।६।१०।१५।२१।२८।३६।४५ यथात्रयाणांसंकलितैक्यमत्रयोऽभितेपदं ३द्वियुतं ५अनेनत्र
याणांसंकलितमिदं ६गुणितं ३० त्रिभक्तंसज्जातंत्रयाणांसंकलितयुति १० एवंसर्वेषांसंकलितैक्यानि १।४।१०।
२०।३५।५६।८४।१२०।१६५ अत्रोपपत्तिः एकोत्तरश्रेढ्यांयुतौपूर्वाङ्कत्रिमोङ्केनगुणितेसतितदर्द्धंपूर्वसंकलितंस्यात्
इतिनियमंदद्देकस्योद्देशेकःनीतद्वयस्यास्तानारेकस्यार्द्धसंकलितमानेतुंप्रकारांतरंदर्शितवांस्तथैकद्विन्यासयो
काउत्तरोत्तरमेकैकेनाधिकासंस्थतः पूर्वांकः सैकः सन्नुअग्रिमांकतुल्योभवतितेनस्वपंगुणितोद्वितस्त्रस्यस्य
संकलितंस्यात् अतःउक्तंसैकपदघ्नमिति अथसाद्वियुतेनेति प्राक्यासंकलितानिधानायुतिर्जातास्तिसा
प्रथमाक्षुत्तरोत्तरंपदाधिकाभवन्ततः पूर्वंयएकः क्षेपः द्वयंचहारआसित्तावेवैकाधिकौक्षतौतदाक्षेपःक्षेपः २त्रयं
हारश्च ३एवंसतेसंकलितस्यापिसंकलितंस्यादितिप्राप्तं ११० अथैकादीनांवर्गस्यघनैक्यानयनार्थंसूत्रंरत्नं

द्विघ्नपदघ्नमिति द्विघ्नपदंकुयुतंत्रिविभक्तेसंकलितेनहतंकृतियोगः संकलितस्यकृतेसममेकाद्यंकघनैक्यमुदीरितमा
द्यैः ११ द्विघ्नं २गुणितंचतत्पदंचैकेनयुतंततस्त्रिभिर्भक्तंसंकलितेनहतेसत्कृतियोगः स्यात् तद्वदेकाद्य
कघनैक्यंसंकलितस्यकृतेः सममाद्यैः उक्तं एकादीनामेकानांसंकलितस्यवर्गस्तुल्यमेवघनैक्यमित्यर्थः अत्रोदा
हरणमनुष्टुभाह - तेषामेवेति तेषामेवचवर्गैक्यंघनैक्यंचवदद्रुतंकृतिसंकलनमार्गेकुशलायदितेमतिः १२ भो
:गणकचेद्यदिवर्गसंकलनमार्गेतेमतिकुशलानहितेषामेवैकाद्यंकानांघनैक्यंचशीघ्रंवद न्यासः १।२।३।४।५।
६।७।८।९ एषांप्रोक्तवर्गैक्यानि १।५।१४।३०।५५।९१।१४०।२०४।२८५ यथात्रयाणांवर्गैक्याजिज्ञासायांपदं ३द्विघ्नं ६कु
युतं ७त्रिभि ३र्भक्तं ७/३ त्रयाणांसंकलितेन ६हते ४२ छेदहृतंसञ्जातंत्रयाणांवर्गैक्यं १४ एवंसर्वेषामथघनैक्यानय
नार्थंएकादीनांसंकलितस्यन्यासः १।३।६।१०।१५।२१।२८।३६।४५ एषांसमद्विघातःस्यादिनावर्गास्ताजा
तान्यनुक्रमादेकादीनांघनैक्यानि १।९।३६।१००।२२५।४४१।७८४।१२९६।२०२५ अत्रोपपत्तिः पूर्वसंकलिते
क्यसिद्धयेद्विघ्नतेनपदेनसंकलितंगुणितंततःतल्लिहतमासीत्इहात्रद्विगुणितपदेसैकेनसंकलितंसंगुण्यत्रिभि
र्भज्यतेयतः संकलितस्यापिसंकलितवर्गैक्यंभवति अयमर्थः संकलितनामसैकपदघ्नपदार्द्धंनचोद्विगुणंविधि
यतेनर्त्तिसैकपदघ्नपदंभवतिनत्रयदाधिकपदवर्गतुल्यंतास्मिन्नुनः पदगुणितेसंकलितयुतेसैत्रिगुणवर्गैक्यंभव
भवतिएवंसंकलितपूर्वंद्विगुणंततः संकलितान्वितंसत्पनोत्ताधवार्थेद्विगुणपदेकयुतेनगुणितंएवंतत्रिगुणवर्गै
क्यसमजातमतस्त्रिभिभागहृत्तेवर्गैक्यंस्यादतउक्तंद्विघ्नपदमिति १३ अथेष्टाद्यंकोत्तरश्रेढीफलानयना
र्थंसूत्रंरत्नेनाह व्येकपदघ्नेति व्येकपदघ्नचयोमुखयुक्स्यादंत्यधनंमुखयुक्दलितंतत् मध्यधनंपदसंगुणितंतत्

47506

गुणितं सत् सर्वधनं गणितं च तदुक्तं ॥ १७ ॥ अत्र यावन्मिताद्यस्मादिना ग्रलाभिधानात् द्वादशमासार्थं तन्मुखमित्युच्यते स
एवादिः अथ प्रतिदिने यावन्मिता वृद्धिः स चयः यावदुत्तरमित्यर्थः यावंतो मुखपर्यायास्तावंत आदेः यावद्दिनपर्यंतं तावत्संग
च्छः पदसंज्ञापि तस्य वा अथवा स्त्याविगतः एको यस्मात् तदेकोनं चयेन चयगुणितो यश्चयः समुखयुगाद्ययुतः
संतरं अंत्यधनं स्यात् चयपितरद्धात्यदिने यावन्मितं भवति तदित्यर्थः अथ मुखयुक् दलितं मध्यं तत्सत्तदेव मध्यधनं स्या
त् ॥ तन्मध्यधनं पदेन संगुणितं सत् सर्वधनं आदिधनमारभ्यांत्यदिनपर्यंतं सर्वधनैक्यं भवतीत्यर्थः तदेव गणितं संज्ञ
मपि बोध्यं ॥ अत्रोदाहरणं वृत्तेनात आद्ये दिन इति ॥ आद्यदिने द्रम्मचतुष्टयं दत्वा द्विजेभ्योनुदिनं दत्तः दाता सखे पंचचयेन
पक्षेण द्रम्मा वद दत्ता कति तेन दत्ताः ॥ १८ ॥ अथ कश्चिद्दाता पूर्वदिने द्रम्मचतुष्टयं दत्वा एनदेव मुखं अनुदिनं प्रतिदिनं पंचवृद्ध्या
चयेन द्विजेभ्यो दातुं प्रवृत्तः तर्हि पक्षे पंचदशदिनात्मके कति द्रम्मा दत्ता स्तानवदेति प्रश्नार्थः न्यासः आदि ४ पदं १५ एकोनं पदं
१४ चयो ५ गुणितः ७० मुखेनैव युतः सन् जातमंत्यदिनीयधनं ७४ एतन्मुखेन ४ युतं ७८ मर्धितं सत् जातं मध्यधनं ३९ एत
त्पदेन १५ संगुणितं सत् जातं सर्वधनं ५८५ मिदमेव गणितमिति अत्रोपपत्तिः यथात्रैव प्रथमदिने द्रम्मचतुष्टयं दत्तं
द्वितीयदिनादारभ्य पंचदशदिनपर्यंतं एवं पंचदशदिनपर्यंतं सा एव गच्छः पंचचयेन दत्तस्य चतुर्दशैव दिनानि जातानि
तथा प्रथमदिनदत्तमभिन्नजातीयत्वात् पृथगेव स्थितं अतो व्येकोगच्छः समुचितः अथानुपातः यद्येकदिने पंच तदा
त्येकन्यूनपक्षे तर्हि चतुर्दशदिने किं १।५।१४ मित्यत्र चतुर्दशभिः चयगुणिते ७० जातं चतुर्दशदिनानां दत्तं तन्मूलदिनदत्तेन
४ युतं ७४ सत् जातमंत्यदिनस्य ७४ द्रम्म ७४ अत उक्तं व्येकपदघ्नेति अथ मध्यधनापेक्षायां आद्यंतधनयो ४ ७४ योगा
७८ र्धं ३९ मध्यधनमत उक्तं मुखयुग्दलितमिति ॥ अथ सर्वधनज्ञानार्थं द्वितीयादिनधनादितः पंचात्तरवृद्ध्या १५ पंचद
शदिनपर्यंतं धनानि विलिख्यते

१	२	३	४	५	६	७	८	९	१०	११	१२	१३	१४	१५	दिन
[illegible]	[illegible]	१४	१९	२४	२९	३४	३९	४४	[illegible]	[illegible]	[illegible]	[illegible]	[illegible]	[illegible]	धनं

एषां योगकृते जातं यत्तत्सर्वधनं भ ३

...तुदाहरण...

वतीत्यथा प्रथमदिनमादिधनं तथा पंचदशदिनस्य धनमंत्यधनं तथा पंचदशादिने ष्वमध्ये अष्टमदिनस्य मध्यस्थत्वात् अष्टमदिनीयं द्रव्यं
मध्यधनं भवति तच्चांत्यधनाद्यधनयोर्योगार्धमितमेव एवं सर्वदिनधनानां योगे सर्वधनं स्यात् अथ लाघवार्थं मध्यधनं गच्छगुणि
तेपि फलं तुल्यमेवात मोक्तं मध्यधनं पदसंगुणितमिति ॥ १९ ॥ एवं विषमगच्छोदाहरणमुक्त्वाधुना समगच्छोदाहरणमाह आदिस्स
प्त चय इति आदिः सप्त चयः पंच गच्छोष्टौ यत्र तत्र मे मध्यांत्यधनं संख्यैकं वद सर्वधनं च किं ॥ १५ ॥ भोः विद्वन् यत्रादिः ७ चयः ५ ग
च्छः ८ तत्र मध्यांत्यधनसंख्ये के सर्वधनं च किं वदेति प्रश्नार्थः आद्यिपूर्वसूत्रक्रमेणैव व्येकपदघ्नेति व्येकपदेन ७ चयो ५ गु
णितः ३५ मुखे ७ युतं ४२ अत्रात्र समदिने मध्यदिनाभावात् मध्यात् आगपरदिनयोर्योगार्धं मध्यधनं भवतीति प्रतीतिरुत्पा
द्यात्वं मध्यधनं ४९ आस्यधनं मुखयुक् ४९ दलितं सत्तदेव ४९ अत्रोपपत्तिः यथा पंचदशदिनमिते गच्छे प्रागिदनसप्तकपरदि
नसप्तके तयोर्मध्ये एकमष्टमदिनं मध्यवत्तनया प्रतीयते एवं यत्र गच्छे द्विहृते सत्सवशेषं स्यात्तत्र मध्यं यत्र शेषं समं स्याच्छि
द्वतत्समगच्छे मध्यधनाभावः अत उक्तमाचार्यैः प्रतीतिरुत्पाद्येति तदर्थं न्यासः

१	२	३	४	५	६	७	८
७	१२	१७	२२	२७	३२	३७	४२

अत्र साष्टकस्य चतुर्थ
तथा पंचमस्य चयं तयोरंतर्दिनद्वयमवशिष्टं तयो २२।२७ योगार्धं ४९ मध्यधनं वाद्यांतधनयोर्योगार्धमपि तदेव सर्वधनं १९६
॥ २१ ॥ अथ गच्छसर्वधनयोर्ज्ञाने चयस्य चयस्य आदिमध्यांत्यस्य सिद्ध्ये आतम्रचं वृत्तार्धं गच्छहृते इति गच्छहृते गणिते वदनं स्या
देकपदघ्नचयार्धविहीने गणिते सर्वधने गच्छहृते व्येकपदघ्नचयार्धविहीने सति आदिः स्यात् उदाहरणं पंचाधिकमि
ति पंचाधिकं शतं श्रेढीफलं सप्तपदं किल चयं चयं वयं विचिन्त्य वदनं वदनं वद ॥ १५ ॥ स्पष्टोर्थः न्यासः सर्वधनमेव श्रेढीफलं वि
दं १०५ आदि ० चयः ३ गच्छ ७ गणिते १०५ गच्छ ७ हृते १५ एकोनपद ६ घ्नचय १८ मुखं ६ युक् गुणितचयार्धेन ९ विहीनं जा
तं वदनं ६ अथास्मादेकपदघ्नेत्यादिनांत्यधनादि यथा व्येकपद ६ घ्नचय १८ मुखं ६ युक् २४ इदमेवांत्यधनं एतन्मु
ख ६ युक् ३० दलितं सत् १५ जातं मध्यधनं १५ अत्रोपपत्तिः पूर्वसूत्रविलोम्येन पूर्वं मध्यधनं गच्छगुणं सर्वधन

माद्यैरिति द्राक्सर्वधने गच्छहृते मध्यधनं ज्ञातं तच्च व्येकपदघ्नचयार्धयुतमुखयोगसमं तेन तस्मादवे व्येकपदघ्नचयार्धयुतं तेन समादिधनं अथादिगच्छसर्वधनेभ्यो चयसिद्ध्यर्थमाहोत्तरार्धेन गच्छहृतमिति गच्छहृतं धनमादिविहीनं व्येकपदार्धहृतं च चयः स्यात् ७ धनं सर्वधनं गच्छहृतं मुखादिविहीनं व्येकपदार्धहृतं चयः स्यात् उदाहरणं प्रथममगमदिति प्र

२ थममगमदह्ना योजनेयोजनेशस्तत्रैव नुनक्रयासौ ब्रूहि यातो ध्वरघ्ना अरिकरिहरणार्थं योजनानामशीत्या रिपुन गरमवाप्तः सप्तरात्रेण धीमान् ११८ यः जनेशः प्रथममह्नादिने द्वे योजने योजनद्वयं गत्वा तदनुदिनमुत्तहरि

र्णोघ्नं सप्तरात्रेण ब्रूता धीमानशीत्या योजनानामशीत्या ८० रिपुनगरमाप मः कृपाकिंमितपथं धरम्या यातः स्तद्ब्रूहि अथ पद्यार्थः

सम्मत अथ समस्त सामंत सीमंती सीमंत सीमान सीमंतिन निजयशः सीरसंचार प्रभृतिः कश्चित्क्ष्माभृत्पाल मालकुल

कधुरीणोऽखिलभूपतिपार्थिवपाल बहलकुलजालपंचाल संचाल संचाल निखिल दक्षचक्रवालदंताब लवा

लकर्षतालकाहलास्फालसंजातपरभागजंघाल निजईड्योजनप्रतापवाचालशौर्याग्निज्वालजालजटा

लनिजजनशालैकालवालसुतपालदलगरलशोभालाप भूजविक्रालकालकरालधारालदग्धकीलालकलि

तकरवालभीतभीतपलायितारिकुलभूपालगहनचयगुंजरलिजालजानालंकरणालभालातिजपालदंताबलहरणा

यागच्छदित्यर्थः आ २ च १० पदं ७ सर्वधनं ८० सर्वधनं ८० गच्छ ७ हृतं ८० आदिना सहितं ८० । ७४ विहीनं ३३ व्ये

कपदार्धेन हृतं ३३ त्रिभिः समच्छेदे नैषां योगः | ८४ | ३३ | ५८ | ८० | ७५ | १३८ | ५० | ११० | २ पवर्तितं सञ्जातं ३ अत्रोपपत्तिः प्राग्व

गच्छेन सर्वधने भक्ते मध्यधनं ज्ञायते तस्मात् आद्यधनं विशोध्यते तत्र हि व्येकपदघ्नचयार्धमवशिष्यते तच्चोत्व्येकपदार्धेन

हीनमिति चयः स्यादित्युपपन्नं ११८ अथ गच्छज्ञानार्थं सूत्रं वृत्तेनाह श्रीढीफलादिति श्रेढीफलादुत्तरलोचनघ्ना

माद्यर्धवक्त्रान्तरवर्गयुक्तात् मूलं मुखोनं चयखंडयुक्तं चयोद्धृतं गच्छमुदाहरंति ११९ श्रेढीफलात् सर्वधनाच्चयनघ्न्या

83
2006

गुणितात् चयार्धमुखान्तरवर्गयुक्तात् सकाशात् मूलं यत् तन्मुखोनं चयार्धयुक्तं चयभक्तं सत् गच्छमुदाहरंति उदाहरणं द्रम्मत्रय

मिति द्रम्मत्रयं यः प्रथमेऽह्नि दत्वा दातुं प्रवृत्तो द्विचयेन तेन शतत्रयं सषष्ट्यधिकं द्विजेभ्यो दत्तं कियद्भिर्दिवसैर्वदाशु १२०

स्पष्टार्थः न्यासः आदि ३ च २ ध ० सर्वधनं ३६० अथैतस्मात् श्रेढीफलं ३६० चयेन २ घ्नात् २ गुणितं १४४० चयार्धं १

वक्त्रान्तरस्यास्य वर्गेण ४ युतं १४४४ अस्मान्मूलं ३८ मुखेन ३ ऊनं ३५ चयखंडेन १ युतं ३६ चयेन २ हृतं जातो गच्छः १८ अस्मा

न्मध्यधनं ३३ मध्यधनं २० सर्वधनं ३६० अत्रोपपत्तिः आदिधनमादिरूपाद्विचयघ्नोयावत् रूपाणि सर्वधनाच्छुद्ध्य

तितद्रूपसंख्या गच्छप्रमाणं स्यात् यावत् तावदर्पणप्रकारान्तरतो गच्छ आनीयते तत्र सर्वधनं नाम मध्यधन गच्छयोर्घातः मध्य

धनं नाम चयार्धव्येकगच्छाघातः मुखयुक्तः अयं सवृद्धिगुणो मुखयुक्तः सन् मध्यधनं भवति एवं सर्वधने द्विगुण

चयेन गुणिते चयार्धवक्त्रान्तरवर्गयुक्ते च चयार्धयुतस्य मध्यधनस्य वर्गो भवति तस्य मूलं चयार्धयुतमध्यधनं त

स्मिन् मुखोनिते चयार्धयुते च सति चयगच्छयोर्घातो भवति तस्मिन् चयेन भाजिते तेन गच्छः स्यादित्युपपन्नं १२० अ

थद्विगुणोत्तरादिफलज्ञानार्थं सार्धार्या विषमगच्छ इति व्येकमिति च विषमे गच्छे व्येकोगुणकः स्याप्यः समेऽर्द्धि

ते वर्गः गच्छक्षयान्तरं स्याद्व्यस्तं गुणवर्गजं फलं यत्तत् १२१ व्येकं व्येकगुणोद्धृतमादिगुणं स्याद्गुणोत्तरे गणितं

१२२ यदा गच्छो विषमस्तदा तं निरेकं कृत्वा गुण इति संज्ञा कार्या तथा समे गच्छेऽर्द्धिते सति गुणकादधो वर्ग इति संज्ञा ले

ख्या एवं गच्छस्य क्षयान्तं नाम यावद्गच्छो निरवशेषः इत्यर्थः अथान्त्यात् सकाशाद्व्यस्तगुणवर्गजं फलं यत्तदेकरहितं गुणोध्ध

तं तथादिगुणं सद्गुणोत्तरे गुणितं सर्वधनं स्यादित्यर्थः अत्रोदाहरणं पूर्वं वराटकमिति पूर्वं वराटकयुगं येन द्वि

गुणोत्तरं प्रतिज्ञातं प्रत्यर्थिजनाय समासेनिष्कान् रातिकति १२३ स्पष्टार्थः न्यासः आदि २ चय गुणोत्त

रः २ वर्गः शेषं विषमगच्छः १५ अतः व्येक १४ मिदं कृत्वा गुण इति संज्ञा तथा कृते १४ गुणः एतत् समस्त

गच्छ ३० अत्र गच्छः । समोऽस्मात् ३ अर्द्धिते सति वर्ग इति संज्ञा स्थापयेत् तथा कृते १५ चेत् १

यत्रादिगुणोत्तरस्तु तस्य च इदमेव अंतिमदिन द्रव्यं सर्वदिन द्रव्यैक्यापेक्षायां तु

तो द्विगुणितं ७ वर्ग इति संज्ञा [illegible] स्थापिता अथ शेषं विषमगच्छः ७ अतो व्येके ६ स्मिन् गुणाख्यः अथेदं ६ समतो द्विगुणितं ३ व
र्ग इति शेषं ३ विषमत्वाद्व्येके सर २ तद्द्विगुणितं एवं ज्ञानापत्ति पर्यवसितम् शेषो गच्छः एवं च सा वर्गस्त
तो विलोमतः कार्यं यथोत्तरगुणः २ अस्य वर्गः ४ अग्रे गुणका स्य तो वर्गो यं ४ उत्तरेण गुणितः ८ अ
स्य वर्गः ६४ अयमुत्तर २ गुणितः १२८ पुनरस्य वर्गः १६३८४ पुनर्गुणाख्ये न निघ्नः ३२७६८ पुन
रस्य वर्गः १०७३७४१८२४ इदमेव गुणवर्गजं फलं अथैतद्व्येकं १०७३७४१८२३ व्येकगुणेन १ भक्ते
जातं तदेव आदि २ गुणं सञ्जातं सर्वधनं वरटकाः इमाः २१४७४८३६४६ एवमेव कस्मिन्नपि सौतायं
स्य वराटकाः ६२१४७४८३६४६ ताः आसां कति निष्का भवन्ति अतः परिभाषाक्रमेण निष्क वरटकाभिः राशिः २०४८०
भागे ह्रीयमाणे लब्धं निष्काणां लक्षमेकं चत्वारि सहस्राणि अष्टशतानि सप्तपंचाशदधिकानि च १०४८
५७ द्रम्माः ९ पणाः ९ काकिण्यो २ वरटकाः ६ अत्र वासना प्रथमधनमाद्यदिने दत्तं तत्र गुणोत्तरवृद्धिर्नास्ति ततो
द्वितीयदिनादितः गुणोत्तरवृद्ध्या दत्तं अतो विषमो गच्छो व्येकः तस्य गुण इति संज्ञा कृता यथात्रैव समगच्छो
दाहरणे आदिर्द्वयं गुणोत्तरा वृद्धिश्च गच्छस्त्रिंशत् एवमादिधनमादौ कृत्वा द्विगुणोत्तरवृद्ध्या त्रिंशद्दिनानां प्रथमे
दिने गुणक मिति शेषं स्यात् द्वितीयदिने च तद्वर्गः तृतीयदिने तु स एव गुणकः ततः चतुर्थदिने गुणवर्गस्य व
र्गः एवं मस्य धनं पर्यन्तिमे कैकान्तरेण गुणवर्गत्वं संभवति तथा चैकादितो विषमसमगच्छेषु क्रमेण गुण
वर्गत्व प्रतीयते अथोद्देशगच्छे विषमगच्छाः कति संतीति [illegible] नि शेषो भवति तावत्तस्याः विभागः २

वर्ग	१४
गुण	१४
वर्गः	७
गुण	३
वर्ग	३
गुण	२
वर्ग	१

कृतः स च गच्छस्यान्तमादौ ऽस्त्येवं समगच्छे योऽसौ विभागो वर्गात्मकः एवमंत्याद्गुणवर्गजं फलं यत्तदिस्य दिने यादि ध
नादेय फलमानीतं भवति तच्चादिधनस्य गुणोत्तरवृद्धिर्बहिर्भूतत्वेन व्येकं तस्माद्गुणोपि व्येको भवति एवं यदि व्येक
गुणेनैतत्फलं तदादिधनेनाप्यमिति अनुपातेन फलमादिधनेन संगुण्य व्येकगुणेन भक्ते सद्धि शिष्टं फलं स्यात् ॥३७
॥अथ विषमगच्छोदाहरणमाह ॥आदिर्द्वयमिति स्पष्टं ॥आदिर्द्वयं सखे वृद्धिः प्रत्यहं त्रिगुणोत्तरा गच्छः सप्त
दिनं यत्र गणितं तत्र किं वद ॥२८॥न्यासः आदिः २ उत्तर ३ गच्छः ७ अत्राप्युक्तवद्गुणवर्गपंक्तिः अत्र गुणः
३ अस्य वर्गः ९ गुणेन हतः २७ अस्य वर्गः ७२९ पुनर्गुणेन ३ हतो जातः २१८७ इदमेव गुणवर्ग
जं फलं व्येकं २१८६ व्येकगुणेन २ उद्धृतं १०९३ आदिनां गुणितं २१८६ ॥१२४॥अथैतत्र संगे गच्छ

गुणः	५
वर्गः	३
गुणः	२
वर्गः	१

२ रेः शास्त्रोपयोगि प्रथमे यं वक्तुमारभते सार्द्धया पदाक्षरमितेगच्छ इति स्पस्य पदानावितिच पादाक्षरमितेग
च्छे गुणवर्गजं फलं च यद्द्विगुणा समवृत्तानां संख्या तद्वर्गो वर्गवर्गश्च स्वस्वपरौ नौ स्यातामर्द्धसमनां विष
माणां २२। पादाक्षरमिते गच्छे च कल्पिते तथा च यद्द्विगुणे सति यद्गुणवर्गजं फलं स्यात् सामवृत्तानां सं
ख्या भवति अथ तद्वर्गः वर्गस्यापि वर्गश्च नौ स्वस्वचतुर्नोसं नो अर्द्धसमानां वृत्तानां विषमाणां च संख्ये
स्यातां अयमर्थः यस्य वृत्तस्य समवृत्तादिभेद जिज्ञासा स्यात् तस्य चरणे यावन्त्यक्षराणि भवेयुस्त
न्मितं गच्छं प्रकल्प्य तथा च यं द्विगुणोत्तरं प्रकल्प्यानेमेरोक्तवत् गुणवर्गजं फलं यदा गच्छतिसे
च समवृत्तानां संख्या ज्ञेया अथ तस्याः वर्गस्य परेन तथैव संख्ययोनः सन्नसमानां

85
2006
42

संख्या स्यात् अथ यः समवृत्तसंख्यावर्गस्तस्यापि वर्गः कार्यः स च स्वमूलोनः स सर्वविषमवृ
त्तानां संख्या स्यात् अथ समवृत्तादिभेदाश्छन्दःशास्त्रोक्ता ज्ञेयाः यथोक्तं वृत्तरत्नाकरे अंघ्रयो यस्य चत्वा
रः समलक्षणलक्षिताः तच्छन्दःशास्त्रतत्त्वज्ञाः समं वृत्तं प्रचक्षते १ प्रथमांघ्रिसमो यस्य तृतीयश्चरणो
भवेत् द्वितीयस्तुर्यवद्वृत्तं तदर्द्धसममुच्यते २ यस्य पादचतुष्कोपि लक्ष्म भिन्नं परस्परं तदाहुर्विषमं वृत्तं छन्दःशा
स्त्रविशारदाः ३ अत्रोदाहरणमनुष्टुभाह समानामिति समानामर्द्धतुल्यानां विषमाणां पृथक् पृथक् वृत्तानां वद मे सं
ख्यामनुष्टुप्छन्दसि स्फुटं १२ भो गणक समानाम् अर्द्धसमानां विषमाणां च वृत्तानामनुष्टुप्छन्दसि पृथक् पृथक् संख्यां
शीघ्रं वद न्यासः अनुष्टुभि अष्टाक्षरात्मकश्चरणो भवत्यतः गच्छोष्टौ ८ उत्तरो द्विगुणः २ अत्रापि प्राग्वत्सर्वेष्टैर्वर्गा इति पूर्व
वज्जाता वर्गपंक्तिः | वर्ग | अथोत्तरः २ अस्य वर्गः ४ अस्यापि वर्गः १६ पुनरस्यापि वर्गः २५६ एतदेव गुणवर्गजं फलं २५६
इयमेवानुष्टुप्छन्द | वर्ग वर्ग | सि समवृत्तसंख्या २५६ अस्या वर्गः ६५५३६ पृथक् ६५५३६ स्वपदेन २५६ ऊ
नो नितेजाऽर्द्धसमानां संख्या ६५२८० अथ पृथक्स्थो यो वर्गस्तस्य वर्गः ४२९४९६७२९६ अयं स्वपदेना
नेनो ६५५३६ नः सन् जाता विषमानुष्टुभां वृत्तानां संख्या सेयं ४२९४९०१७६० अत्रोपपत्तिः प्रागुक्तापि विशेषो
निरूप्यते तत्र पादानां समत्वे द्वेधा स्वभावतो निमित्ताच्च यस्यार्द्धरूपे तेसति न समत्वं भज्यते स नैसर्गिकः
समः तथा स्यार्द्धरूपे तेविषमत्वं स निमित्तसमः स्वरूपेन विषमस्यापि द्विगुणत्वेन समत्वं जातमास्ती
त्यर्थः एवं यस्य वृत्तस्य चरणाः स्वभावसमः तत्र समं ... मादि विधौ क्रियमाणे वर्गान्तमेव संभ ४२
वति न ... चरणो निमित्ततः समः तत्र ... संभवति एवं पूर्वापेक्षया परस्य ... वर्गगुणमधिकं स्यात् अतः समवृत्तसंख्या वर्गाः ...
ईसम ... संख्या ... विषमवृत्तमित्यादि सर्वं प्रागुक्तप्रस्तारविधिना ... सम्यगवबुध्यते ॥ ॥ इति श्रेढीव्यवहारः ॥

तत्कृत्योर्योगपदं कर्णो दोःकर्णवर्गयोर्विवरात् ॥ मूलं कोटिः कोटिश्रुतिकृत्योरन्तरात्पदं बाहुः ॥२॥

॥ अथैवं संप्रपंचं श्रेढीव्यवहारं निरूप्येदानीं क्षेत्रव्यवहारं निरूपयन्नादौ तत्स्वरूपं भुजको 84/2006
टिश्चार्याद्वयेनाह ॥ ॥ इष्टाद्बाहोरिति ॥ तथा च तत्कृत्योर्योगपदमीति ॥ इष्टाद्बाहोर्यः स्यात्
स्पर्द्धिन्यां दिशीतरो बाहुः ॥ त्र्यस्रे चतुरस्रे वा कोटिः सा कीर्तिता तज्ज्ञैः ॥१॥ इष्टो भुजो यस्यां दिशि भ
वेत् तत्स्पर्द्धिन्यां तस्यां पूर्वां दिशि यद्गतरो बाहुः सैव कोटिः त्र्यस्रे त्रिकोणे चतुरस्रे चतुःकोणक्षे
त्रे च कीर्तिता ॥ अनेन भुजकोट्योर्नाम भेदेन न स्वरूपभेद इति सूचितं ॥ द्वयोरन्यतमा कोटिर
परो भुजश्चेत्यर्थः दोः शायो भुजो भुज बाहुः करो हस्तः पाणिरिति पर्यायाः ॥ तथा च कोटिरुच्छि
त्युच्छ्रायाः ॥ कर्णः श्रवणः श्रुतिः श्रवः इति ॥ एवं भुजकोटियुक्त्या त्रिकोणक्षेत्रं अथैषामन्यत 43
मयोर्ज्ञाने ऽन्यतमज्ञानं सूत्रमार्ययाह तत्कृत्योरिति त्र्यस्रादीनां पूर्वपरामर्षकत्वात् सम ... पू
र्वोक्तभुजकोटिकृत्योर्योगपदं कर्णः अथ कोटावज्ञातायां भुजकर्णवर्गयोरन्तरस्य मूलं कोटिः
स्यात् भुजाज्ञाने कोटिकर्णवर्गान्तरमूलं बाहुः स्यात् ॥२॥ अथ प्रकारान्तरेण वर्गयोगवर्गान्तरज्ञा
नं तु सूत्रमनुष्टुभा सार्द्धेनाह ॥ राश्योरिति ॥ राश्योरन्तरवर्गेण द्विघ्ने घाते युते तयोः ॥ वर्गयोगो भवे
देवं तयोर्योगान्तराहतिः ॥३॥ वर्गान्तरं भवेदेवं ज्ञेयं सर्वत्र धीमता ॥ ययो राश्योर्योगोपेक्षितस्त
योरन्तरस्य वर्गेण द्विघ्ने तयो राश्योर्घाते युते सति वर्गयोगः स्यात् ॥ अथैकत्र राश्योर्योगोन्यत्रोत

रंच तयो राहति र्गुणनं तद्वर्गांतरं एवं बुद्धिमतां ज्ञेयं सर्वत्र। अत्रोपपत्तिः। समद्विघातो द्विगु
णः समयो वर्गयोगो भवेत्। अथ लाघवार्थं तयो घातो द्विगुणो राश्यंतर वर्गो नो वर्गयोगो भव
ति सा चे दंतर वर्ग युतः क्रियते तदा वर्गयोगो भवति॥ अथ योगांतराहति रंतर वर्गो भवति तयो वर्गां
तरं राशि वियोग भक्तं योग इति पूर्वमेवोक्तं इत्युपपन्नं॥ अथ पूर्वोक्त श्लोकद्वय विषयो
दाहरणमनुष्टुभाह कोटिरिति॥ कोटिश्चतुष्टयं यत्र दोस्त्रयं तत्र का श्रुतिः॥ कोटिदोः कर्ण
तः कोटिश्रुतिभ्यां च भुजं वद॥४॥ स्पष्टोर्थः न्यासः अथ तत्कृत्योर्योग इत्यादिना साध्यते य
था भुजकोट्यो ४ वर्गौ ९। १६ अनयो योगः २५ अस्य पदं जात कर्णः ५ क्षेत्रदर्शनं 
अथ राश्योरिति राश्यो ४। ३ अंतरं १ अस्य वर्गेण द्विघ्नराश्यो ४। ३ घाते २४ युते
जातो राश्यो वर्गयोगः २५ अस्य पदं कर्णः ५ अथ वर्गांतरं यथा राश्योः ३। ५ योगो
वियोगो ८। २ अनयो राहति र्जातं वर्गांतरं १६ अस्य पदं कोटिः सैव ४ अथ को
टिश्रवणाभ्यां भुजानयनार्थं न्यासः  कोटिश्रुती ४। ५ अनयो १६। २५ रंतरात् ९ पदं ३
जातो बाहुः। अत्रोपप
शलाकां को
टिं प्रकल्प्य
त्तिः॥ यथात्रैवोदाहरणे चतुरंगुलमितां
तथा त्र्यंगुलमितां शलाकां भुजं प्रकल्प्य

तेद्वे तीर्यगूर्ध्व रूपे प्रसार्य तदग्रे योरंतरे पंचांगुल शलाकामितं कर्णं निधाय भुजकोटि यो
गात्कर्णपर्यंत लंबाकारामन्य शलाकां विन्यसेत्। एवं कृते सत्यूर्ध्वाधो विभागेन क्षेत्रे भवतस्त
त्रोर्ध्व विभागे क्षेत्रे पूर्वं या कोटिरासीत्स कर्णो जातः कर्णोर्ध्व खंडे कोटि र्जाता लंब शलाका
च भुजः। एवमधो विभागे भुजः कर्णो जातः कर्णाधः खंडं भुजः लंब शलाका च कोटिः॥ अथानु
पातः। यदि पंचमिते कर्णे ५ चतुर्मिता ४ कोटिस्तर्हि चतुर्मिते किमिति ५। ४। ४ फलं ४ मिच्छा
या ४ गुणं १६ प्रमाणेन ५ भक्तं कर्णोर्ध्व खंडं १६/५ अथ पंचमिते कर्णे त्रिमिते भुजस्तर्हि त्रिमि
ते किमिति ५। ३। ३ प्रागवल्लब्धं कर्णाधः खंडं ९/५ मीदं (पंचमीत कर्णे) अनयो योगे क्रिय
माणे २५/५ भुजकोटि वर्गयोरेव योगः समोस्ति तस्मिन्नुच्छेदीभूतेन कर्णेन ५ हृते लब्धं कर्ण
एवास्यो दतः स एव कर्ण वर्गः इति ज्ञातं। अथवा कर्ण प्रमाणं यावत्तावन्मितं प्रकल्प्य ततः
क्षेत्राविपरिते न्यस्ते प्रस्तांत्रि भुजत्वमेति इत्याद्य लघु मितिं विस्तरात्। एवं क्षेत्रं जातं॥ अथ भिन्नो
दाहरणं॥ सांघ्रीति॥ सांघ्रीत्रयमितो बाहुर्यत्र कोटिश्च तावती॥ तत्र कर्ण प्रमाणं किं क्षे
त्रं प्रब्रूहि मे द्रुतं॥५॥ स्पष्टं न्यासः छेदघ्नेति सवर्णजातौ १३/४ १३/४ अनयो वर्गौ १६९/१६ १६९/१६
अथ प्रो योगो द्वाभ्यामपवर्तितः १६९/८ जातो वर्गयोगः अस्य मूलं न संभवत्यतः अस्यैव

सदत्वात्कर्णः करणिगत एवज्ञेयः। तथाप्यासन्नमूलेन भवितव्यमेमत आह अस्येति। अ
यासन्नमूलानयनार्थं सूत्रमनुष्टुभाह। वर्गेणेति। वर्गेण महते छेन वधाच्छेदांशयोर्हता
त्। पदं गुणपदघ्नछिद्भक्तं निकटं भवेत्॥६॥ छेदांशयोर्वधात्महता केनचिदिष्टेन वर्गेण
हतात्सकाशात् यत्पदं तद्गुणपदघ्नं नाम यः महानिष्टवर्गो गुणकः कल्पितोऽस्ति स एव गु
णकः तस्य यत्पदं तेन गुणितेन छेदेन भक्तं सदासन्नमूलं भवेत्। अत्रोपपत्तिः करणिवर्गः स्व
छेदेन भक्तः सन्कर्णवर्गो भवति तस्य मूलं कर्णः। अथ करणिगतवर्गस्य छेदेन भागो न गच्छति
ति सत्वात्। भिन्नमंकं प्रकल्प्य तेन स्वछेदेन गुणकेन करणिगतवर्गं संगुण्य तस्य मूलं छेदभक्तं
सदासन्नमूलं भवतीति प्रकारांतरं दर्शितं। एवं यदिष्टः कल्पितस्तस्य वर्गं कृत्वा तेन छेदेन छे
दस्य वर्णितेन गुणनं कार्यं यतो वर्गेण वर्गं गुणयेद्भजेच्चेति करणिगुणनप्रकारोऽस्ति अथेष्ट
वर्गगुणितस्य वर्गस्य यन्मूलं तदिष्टगुणितछेदगुणितमधीकं भवति अतः छेदगुणेष्टभ
क्तं सदासन्नपदं स्यादित्युपपन्नं। अथ कोणगतस्य वर्गस्य न्यासः। १५९ छेदांशयोः १६९ गु
णितं १३५२ अत्र कल्पितेन महदिष्टस्य १०० वर्गेण १०००० गुणितं जातं १३५२०००० अस्य मू
लमासन्नं ३६७७ एतद्गुणस्यास्य पदेन १०० पदेन १०० गुणेन गुणितेन छिदा ८०० भक्तं स

जातमासन्नमूलं $\frac{४}{७७}$ अथाद्यः पदं कियत्संख्यं किमात्मकं इति मुग्धत्रैवर्णिकस्य तेन तदर्थं ग
णितरहस्यं सूर्यमते $\frac{९}{००}$ कृतं आश्रितपद हृतिपुत्र इति भीष्मस्मृतिर्द्विगुणमूलं मेकांगं॥ वांछित घा
दवशेषात्सावयवं स्यात्कुर्मूलं।१। अत्र पूर्वं कर्णगतवर्गमेनं १५९ स्वछेदेन ८ भक्त्वा लब्ध
कर्णवर्गः २१ अस्यासन्नपदं कर्णो भवतीति कृत्वा आश्रितपदहृतिर्युक्तेत्यादिना एकविंशते २१
राश्रितपदं ४ अस्य हृतिः १६ अनयापूर्वा १६ गता भीष्महृतिः ५ युक्ता ३१ असौ पूर्वागतेन ४ द्वि
घ्नाश्रितपदेन ८ भक्ता लब्धं ४ शेषं ७ षष्ट्या ६० संगुण्य ३०० पुनर्हृतं सञ्जातं सावयवं $\frac{४}{३१}$ अथा
स्य गोमूत्रिकान्यायेन वर्गः २१ अभीष्टवर्ग २१ युतः अद्रक्स्मिन्द्विगुणसावयव ३० मूलेना
$\frac{४}{३१}$ नेन सवर्ण्य भक्तं लब्धं $\frac{३}{३२}$ मेकविंशतेर्मूलं $\frac{४}{३}$ तथा ३ चापोक्तप्रकारेपि गुणपदघ्नछि
$\frac{३१}{३०}$ क्तमित्यत्र भागो न्हियमाणे लब्धानि रूपाणि ४ शेषं ७११ चतुर्दशाभिरपवर्त्य प्र
दर्शनं वर्णं रूपादधः स्थाप्य जातं तदेव $\frac{४}{३१}$ अस्य वर्गे गोमूत्रिकं यांक्रियमाणे पुनर्जाता ए
कविंशतिः। एवं सर्वत्र। अथ भुजकोट्योरेकतरज्ञाने इतरद्वयस्य ज्ञानार्थं जात्यत्र्य
स्रप्रकारद्वये सूत्रद्वयमाह॥ इष्टो भुजोस्माद्धीति॥ इष्टो भुज इति च। इष्टो भुजोस्माद्विगुणे
ष्टनिघ्नादिष्टस्य कृत्यैकवियुक्तया कंप्तं। कोटिः पृथक्सेष्टगुणा भुजोना कर्णो भवेत्त्र्यस्र
मिदं तु जात्यं॥१॥ इष्टो भुजोऽस्तत्त्यतिरिष्टभक्ताद्विस्थापिते ष्टोन युताऽर्द्धिता वा॥ तौ कोटिक

र्णाविति कोटितो वा बाहुः श्रुतिर्या करणीगतेस्त ॥८॥ यइष्टो भुजः कल्पितः अथवेष्टोज्ञातो यो भुजः
सः द्विगुणं यच्चादिकमिष्टं तेन गुण्यः अस्मात्सकाशादेक रहितेनयेष्टघ्नत्यापहृतः सा कोटिः रतां पृ
थक्स्थाप्य इष्टेन संगुण्य भुजोना सत्या कर्णः स्यात् एवमिष्टाभुजात्कोटिर्वा प्रत्येकमुत्पद्यते तज्ज्ञा
त्यं स्यत ॥९॥ द्वितियप्रकारमाहाइष्टेनेति इष्टयेष्टपो भुजः तन्त्वेनेतिरिष्टेन सर्वम्पाद्विस्थापिताक्र
मादिष्टोनयुतार्द्धिता च सतिवेति प्रकारांतरे कोटिकर्णौ स्यातां इत्यमुनाप्रकारेण वेत्यथवा
कोटितो बाहुकर्णौ भवतः या कल्पिता दृष्टा वा कोटिः स्तुतिरिष्ट भक्ता द्विस्थाइष्टेनोनान्याद्विती
सातिबाहुश्रुतिर्भवति इत्यर्थः कीदृसी कोटिः श्रुतिः अकरणीगते वर्गत्वेनाभितेस्त इत्यर्थः ॥ उदा
२ हरणं भुजेति भुजेद्वादशके यो यो कोटिकर्णवने कथा प्रकारांस्याच दक्षिप्रतौ नाव करणिगतौ ॥
१॥ स्पष्टं न्यासः भुजः इष्टं २ द्विघ्नेष्टेन ४ गुणितभुजं ४८ इष्टं २ कृत्यौ ४ कं १ योन याप्ता कोटिः १५
पृथगीयमीष्टं गुणा ३२ भुजोना जाताः कर्णः २० एवं भुजः १२ इष्टेन ३ द्विघ्नेन ६ गुणितघ्न ७२ इष्टस्यैव
त्यैकवियुक्तया ८ आप्ता ९ कोटिः इयं पृथक्स्था ९ इष्टगुणा २७ भुजोना १५ जातः क
र्णः १५ एवं पंचेष्टेन अथप्रकारांतरेणाहा इष्टा भुजा इति सुस्पष्टबा
हुः १२ अस्य कृतिः १२ । १४४ इष्टे न ४ भक्ता ३६ द्विस्थाइष्टोनयुता ३२ । अर्द्धि
ताजातौ कोटिश्रवणौ १६ । २० अथैवेष्टं से एवबाहुः १२ अस्य वर्ग १४४
इष्टभक्तः १२ द्विस्थः १२ । १२ इष्टोनयुतश्च १० । १४ अर्द्धितौ जातौ कोटिकर्णौ ५ । ७ अथे
ष्टा कोटिः १५ अस्या वर्गः २२५ इष्टेन २ हृतः १२८ द्विस्थः इष्टोनयुगर्द्धितश्च ६३ । ६५ जा तौ
बाहुकर्णौ ६५ एवमीष्टा कोटीः ३५ अस्या कृतिः १२२५ इष्टेन भक्ता २५ द्विस्थो
इष्टोनयुता २४ । ७४ अर्द्धिता जातौ बाहुश्रुती १२ । ३७ अकरणीगते क्षेत्रे पुनरिष्ट
१२ । भुजः अस्य वर्गः १४४ इष्टेन भक्तं २४ द्विस्थः इष्टोनयुक् १८ । ३० अर्द्धितः जातौ को
टिकर्णौ पूर्वसमौ ९ । १५ पुनरिष्टा भुजः १२ अस्य वर्ग १४४ इष्टोन २ भक्तः १८ द्विस्थे कष्ट
नयुगर्द्धितश्च जातौ कोटिकर्णौ ९ । १५ जातसमौ एवं दिष्टवशादानंत्यं ॥ अत्रोपपत्तिः । उद्दिष्ट
भुजक्षेत्रोपेक्षया कुत्रचिल्लघुक्षेत्रे द्विगुणेष्टमीता कोटिर्भवति तथेष्टवर्गातिरेकस्तत्रैव
भुजो भवतीति नियमो दृष्टः । यथात्रेष्टं २ द्विघ्नं जातं कोटिः अथेष्टस्य वर्ग ४ निरेको जातो
भुजः ३ एवं भुजकोटिः ३ । ४ अथवा पत्रेष्टं ३ द्विघ्नं ६ जातं कोटिः ६ तथेष्टवर्गा ९ निरेको जातो
भुजः एवं दोकोटि ६ । ८ अथानुपातः यद्यनेन भुजेनेरूपं कोटिः ४ तदोद्दिष्टभुजेन किमिति
प्र ३ फ ४ इच्छा १२ उद्दिष्टभुजो द्विगुणेष्टेन गुणितः निरेकयेष्टकृत्या भक्तः फलं कोटिर्भवति
एवं सा कोटिर्यदिष्टेन गुण्यते तदा भुजकर्णयोर्योगो भवति तथा सैवेष्टेन भाज्यते तदि
भुजकर्णयोरंतरं भवति यत इष्टवशादेव तयोरासि रद्धि भवतः एवं भुजकर्णयोर्योगाद्

नेविशोधिते शेषं कर्णस्यात् वा तयोरंतरे भुजाभे तथा सति कर्णः स्यात् इष्टं स्पो॥ अथेष्टा भुज इति॥ अत्रेष्ट
मितांतरौ कटिकर्णौ स्यातां तत्र भुजवर्गादिष्टहृताद्यल्लब्धं स कोटिकर्णयोगः यस्तो भुजवर्गस्तु कटिकर्ण
योर्वर्गांतरमितो भावति कोटिश्रुतिस्त्पोरंतरात्पदं बाहुरित्युक्तेः एवं वर्गांतरराशियोगभक्ते इत्यादि
नेष्टमितेन राश्यंतरेण भुजवर्गे भक्ते योगो लभ्यते॥ इष्टश्च तयोरंतरं अथ योगांतरेणोनयुतो द्विता
स्ता वितिसंक्रमे कोटिकर्णौ भवतः॥ अत उक्तं॥ द्विस्थापितेष्टनयुतार्द्दिता वेति॥ अथ च यत्रेष्टमितां
तरौ भुजकर्णौ स्यातां तत्र कोटिवर्ग इष्टहृते सति भुजकर्णयोगो ज्ञायते यतस्तत्रेष्टश्च तयोरंतरं कोटिव
ब गस्तु भुजकर्णयोर्वर्गांतरं अतः प्राग्वत्संक्रमविधिना भुजकर्णावुपपद्यते॥ अत उक्तं कोटिर्वोपपप
न्नं॥१०॥ अथेष्टकर्णात्कोटिभुजानयनं इष्टेनेति॥ इष्टेन निघ्नाद्द्विगुणाद्गुणाच्च कर्णादिष्टस्य कृत्यैक
युतया यदाप्तं॥ कोटिर्भवेत्सा पृथगिष्टनिघ्निता कर्णयोरंतरमस्य बाहुः॥ १०॥ द्विगुणात्कर्णादिष्टे
न गुणात्सोकाशादेकयुक्तेयेष्टकृत्या यदाप्तं सा कोटिः॥ सा पृथक् द्विःस्थाप्या एकत्रेष्टनिघ्ना
तस्याः कर्णस्य चांतरं बाहुः इमावपि बाहुकर्णावकरणीगतौ वर्गत्वेनाभिमतौ॥ उदाहरणं॥ स्प
ष्ट॥ पंचाशीतिमिते कर्णे यायावकरणीगतौ॥ स्यातां तौ कोटिभुजौ तौ तौ वद कोविद सत्वरम्॥११॥
न्यासः ८५ इष्टं २ कर्णो ८५ द्विघ्नः १७० इष्टगुणितः ३४० सैकयेष्टकृत्या ५ लब्धा कोटिः ६८ इयं
द्विघ्नि १३६ अस्याः कर्णस्य चांतरं ५१ तरं जातो भुजः ५१ कोटिरपरा ३८ क्षेत्रमेवं च तुर्भिरि ४३

ह ४क्षेत्रं अत्रोपपत्तिः कल्पिता॥ अस्मिन्क्षेत्रे द्विगुणेष्टमीना कोटिः मथेष्टं कृतिः सै
कान्त्रै ५० ६८ नकर्णौस्ति ततः प्राग्वदनुपातः यद्यनेन कर्णेनेयं को ७० ७५ टि २ सैकहतेष्ट
कर्णेन ३५ किमिति इष्टाकर्णेन द्विगुणेष्टनिघ्ने सैकेन इष्टवर्गेण हृते लब्धं कोटिः स्यात् अथ सा चेदिष्टे
गुण्यते तर्हि भुजकर्णयोर्योगो भवति तथेष्टेन हृयंते तर्हि तयोरंतरं स्यात्॥ ततः संक्रमणविधिना भु
जकर्णयोरानयनं विधेमिति प्राप्तं॥ अथ लाघवार्थं यदि ज्ञातकर्णो भुजायोगाच्छोध्यते तर्हि भुजोव
शिष्यते इत्युपपन्नं॥ अथ वेति पद्यांतरेणात्रैव प्रकारः॥ इष्टवर्गेण सैकेनेति इष्टवर्गेण सैकेन
द्विघ्नः कर्णोथवा हृतः॥ फलोनश्रवणः कोटिः फलमीष्टगुणं भुजः॥ सैकेनेष्टवर्गेणाद्विघ्नः कर्णो
भक्तः यल्लब्धं फलं तेन श्रवणो रहितः सन् कोटिः स्यात् फलं इष्टेन गुणं भुजः स्यात्॥ न्यासः
स एव कर्णः ८५ द्विघ्नः १७० इष्टस्य वर्गेण ४ सैकेन ५ हृतः लब्धं ३४ नानेन हीनः कर्णो जाता कोटि
५१ पुनः फलं ३४ इष्टगुणं जातो भुजः ३८ ३५ एवं चतुर्भिर्वा ७५।८० अत्र द्वौ पक्षौ॥ छिन्ना नामभेदं ए
वन रूपभेदः॥ काहिचित्कोटिभुजस्थाने कोटिरित्युच्यते यतः इष्टा वा बाहोर्यः स्यात्तत्स्पर्द्धिन्यां दिशि इतरो
बाहुरित्युक्तेः॥ अत्रोपपत्तिः॥ पूर्वक्षेत्रे द्विगुणेष्टमिता लघुक्षेत्रे कोटिः कल्पिता सा द्विहानिं द्विभि
र्भेव कल्पिता॥ कर्णस्तु यथावस्थित एव अथ प्राग्वदनुपातेन ५।२।८५ यत्फलं ३४ स्यात्तद्वा
इष्टेन गुणं॥ यतः स्वल्पापेक्षया इष्टगुणं न्यूनं वृत्तं॥ अथ यथागतं यत्फलेन देव भुजकर्णयोरंतरं

तस्मिन्कर्णाच्छोधिते भुजो वा शिष्यत इत्युपपन्नं ॥११॥ अथ त्रिभुजे ज्ञाते भुजे तेषां सिद्ध्यै सूत्रम
नुष्टुभाह ॥ इष्टयोरिति ॥ इष्टयो राहतिर्द्विघ्नी कोटिर्वर्गान्तरं भुजः ॥ कृति योगस्तयोरेव करणिश्या
करणिगतः ॥१२॥ यो का ॥ वपि द्वौ इष्टौ प्रकल्प्य तयो राहतिः कोटिः स्यात् तयोरेवेष्टयोर्वर्गान्तरं
भुजः स्यात् तयोरेव कृति योगः कर्णः स चाकरणिगतः ॥ मूलेन पेक्षत्वात्कोटि भुजयोर्व
र्गैक्य एव कर्णो भवतीत्यर्थः ॥ इदमपि क्षेत्रे जात्ये प्रसिद्धं उदाहरणं ये येरीति स्पष्टं ॥ ये यैस्त्र्य
स्रे भवेज्जात्यं कोटि दोः श्रवणैः सखे ॥ त्रीनप्यविदितानेतान्क्षिप्रं ब्रूहि विचक्षणः ॥१३॥
न्यासः अत्रेष्टौ १।२ अनयाराहतिर्द्विघ्ना जाता कोटिः ४ इष्टयो १।२ वर्गान्तरं भुजः
३ वर्गयो योगश्च कर्णः ५ एवं क्षेत्र दर्शनं एवमिष्टौ २।३ आभ्यामपि प्राग्वज्जा
तं क्षेत्रं अथ वेष्टौ २।४ आभ्यां प्राग्वत्  एवमनेकप्रकारः
अत्रोपपत्तिः यत्र क्वापि क्षेत्रे स्वेच्छया कल्पितानि योरन्तरवर्गैक्यं कोटि
भवति तथा तयोरेव योगान्तराहतिर्भुजो भवति ॥ यतो भुजकोटि योगोद्दज्जुमार्गोन्नीय
माने लंबाकारं यत्सूत्रं तद्यत्र करणे लगति तदग्रं कर्णयोगावधि यदन्तरं वर्गप्रमितं
भवेदतः कोटेरपेक्षया कर्णान्तरवर्गेणाधिको भवति ॥ एवं कोटिज्ञानार्थं इष्टयोर्वर्गैक्यं अ
न्तरवर्गेणोनं कार्य्यमिति प्राप्तं ॥ अपलाघवार्थं इष्टयोराहतिर्द्विघ्ना सती फलं तुल्यमेवा अ

अभुजज्ञानार्थं इष्टयोर्योगान्तराहतिः कार्य्येति प्राप्ते तयोर्वर्गान्तरमेव कृतिमित्युपपन्नं ॥ अथ को
टिकर्णयोगे भुजे च ज्ञाते पृथक्करणे सूत्रं वृत्तेनाह ॥ वंशाग्रेति ॥ वंशाग्रमूलान्तरभूमिवर्गो
वंशोद्धृतस्तेन पृथग्युतोनः ॥ वंशौ तदर्द्धे भवतः क्रमेण वंशस्य खंडे श्रुति कोटि रूपे ॥ वंशस्य
वेणोरग्रं च मूलं चाग्रमूले तयोरंतरं भूमिर्मध्यमानं तस्य यो वर्गः स वंशोद्धृतः यद्धब्धं फलं तेन पृथक्स्था
पितो वंशः क्रमाद्युतोनः कार्य्यः तदर्द्धे क्रमेण श्रुतिकोटिरूपे वंशस्य खंडे भवतः ॥ उदाहरणं ॥ यदीति ॥ यदि
समभूमिवेणुर्द्वित्रिपाणिप्रमाणो गणक पवनवेगादेकदेशे स भग्नः ॥ भुवि नृपमितहस्तेष्वंग लग्नं
तदग्रं कथय कतिषु मूलादेशभग्नः करेषु ॥१४॥ भोः गणक यदि समभुवि रूढो द्वित्रि हस्तप्रमाणो
वेणुर्द्वात्रिंशद्धस्त आसीत् स पवनवेगाद्वायुवेगेनैकदेशे भग्नः भंगानन्तरं तदग्रं चेत् एवाग्रं वंशमूल
सकाशात् षोडशहस्तेषु भूमौ लग्नं तर्हि जिति संबोधने भो गणक एष वंशः मूलात्कतिषु करेषु
भग्नस्तत्कथय न्यासः अत्र वंशाग्रमूलान्तरभूमिः १६ अस्य वर्गः २५६ वंशमानेन ३२ भ
क्तः ८ अनेन पृथक्स्थौ वंशौ ३२।३२ युतोनौ ४०।२४ अर्द्धितौ जातौ श्रुतिकोटी २०।१२ एवं
द्वादशकरेषु मूलतो भग्न इति ज्ञातं तच्च क्षेत्र दर्शनं अत्रोपपत्तिः उत्तोल्लह
रणोद्देशे प्रसिद्धं क्षेत्रमु पन्नं तत्र वंशाग्रमूलान्तरभूमिर्भुजः वंशभंगा
दधस्तनखंडं कोटिः ॥ तथा पतदूर्ध्वखंडं भूमिपर्यन्तं नतं स कर्णः एवं को ॥ ॥ टि कर्णयोगे

ज्ञातः ३२ भुजश्च १५ अथ वंशमूलात् ६ जमार्गेण कर्णप्रतिनियमानं सूत्रं यत्र कर्णेन लगति। तन्नोधः क
र्णाग्रपर्यंतं यद् वंशखंडं तदेव कोटिकर्णयोरंतरं तच्च ज्ञातं एवमत्राप्यदृष्टिक्षेत्रमुत्पन्नं॥ तत्र कोटिक
र्णांतरं भुजः लंबाकारं सूत्रं कोटिः वंशाग्रमूलांतरभूमिः कर्णो भवति। अथ कोटिकर्णांतरज्ञाना
र्थमनुपातः॥ यदि द्वात्रिंशन्मिते कोटिकर्णयोगे षोडशमितो भुजस्तर्हि षोडशमिते किमित्यत्र॥
३२।१६।१६ फलेष्टयोः समत्वात्तदेव २५ वंशाग्रमूलांतरभूमि वर्गो भवति सप्रमाणे भुजेन वंशो
नो हृतस्तत्र फलं कोटिकर्णांतरं ८ एवं कोटिकर्णयोरंतरे च ज्ञाते योगांतरेणोन युतो द्विहृता विति
संक्रमणविधिना कोटिकर्णरूपयोर्वंशखंडयोरानयनं विहितमित्युपपन्नं॥ अथ भुजक
र्णयुतौ कोटेश्च ज्ञातायां पृथक्करणार्थं सूत्रवृत्तं॥ स्तंभस्येति॥ स्तंभस्य वर्गोऽहिबिलांतरेण भ
क्तः फलं व्यालबिलांतरालात् शोध्यं तदर्द्धप्रमितैः करैः स्याद्बिलाग्रतो व्यालकलापियोगः॥१५
स्थंभस्य स्थाणोर्वर्गः अहिश्चबिलं चाहिबिले॥ तयोरंतरभूमिमध्यभूमानेन भक्तः तत्र य
त्रलब्धं फलं तत्सर्पबिलयोरंतरालमानाच्छोध्यं शोधिते यदवशिष्टं तदर्धमितैः हस्तैः बिलाग्रा
त्सर्पमयूरयोगः स्यात्॥ उदाहरणमस्तीति॥ अस्ति स्तंभतले बिलं तदुपरि क्रीडाशिखी स्थि
तः स्तंभे हस्तनवोच्छ्रिते त्रिगुणिते स्तंभप्रमाणांतरे॥ दृष्ट्वाहिं बिलमाव्रजंतं पतति यत्र सन
त्स्योपरि क्षिप्रं ब्रूहि तयोर्बिलात्कति करैः साम्येन गत्योर्युतिः॥१७॥ स्तंभतले विवलेमास्ति ४८

तदुपरि स्तंभोपरि हस्तनवकोन्नते क्रीडामयूरः स्थितः स मयूरस्त्रिगुणितस्तंभप्रमाणांतरे स्तं
भमूलात् सप्तविंशतिहस्तभूभागे बिलं प्रत्यागच्छंतं सर्पं दृष्ट्वा तीर्यक् करणरूपं यथा स्यात्तथाहेरुप
र्यपतत् तत्र ताबिलात्कतिकरैः साम्येन तयोर्गत्योर्युतिर्योगः जातः तत् क्षिप्रं ब्रूहि न्यासः
स्तंभ ९ स्यवर्गः ८१ अहिबिलांतरेण २७ भक्तः फलेनानेन ३ अहिबिलांतरं ऊनं २४ अस्या
र्द्धं १२ मितैर्हस्तैर्बिलात्सर्पमयूरयोगः एतत् एव १२ करा बिलयुक्त्यो मध्ये भुजत्वेन ज्ञाताः अत्र भुजः १२ क
र्णयोगाद्विशोध्यते ततः अवशिष्टः कर्णः १५ एवं यस्मिन् स्थले कलापि विषधरमङ्गाक्षित् तस्मात्स्था
नाद्बिलपर्यंतं गच्छता हिना कर्णमिताः कराः १५ अतिक्रांताः तावंत एवाहेरूपरि पतता मयूरेणापीत्युभ
योर्गतिसाम्यमित्यर्थः एवं क्षेत्रदर्शनं अत्रोपपत्तिः अत्रापि प्राग्वज्जात्यं क्षेत्रं तत्र स्तं
भः कोटिः ९ सर्पप्रतिमयूरमार्गः कर्णः स र्पमयूरयोगबिलयोरंतरं भूमिर्भुजः एवमत्र
तोः कर्णयोगो ज्ञातः कोटिश्च ज्ञाता तयो र्न्यासः ३।९ अत्रापि प्राग्वद्बिलात्मयूरमार्ग
पर्यंतं सजुतयानियमानं यानस्य स्तंभ स्य च यदंतरं तद्भुजकर्णांतरं सातत्रोत्पन्नं
न्ने लघुक्षेत्रे कोटिः सूत्रं च भुजः स्तंभ कर्णभुजयोगः॥ अथ भुजकर्णांतरज्ञानार्थमनुपातः॥ यदि सप्त
विंशतिमितेन भुजकर्णयोगेन स्तंभमितात् ९ कोटिस्तर्हि स्तंभमितेन किमिति २७।९।९ तत्र स्तंभ
वर्गोऽहिबिलांतरेण भक्तः सत्फलं भुजकर्णांतरं एवं भुजकर्णयोर्योगांतरे च ज्ञाते संक्रमणविधिना भु

रानयनं विहितं तथापि व्यालकलापि लोगः कियतान्तरेण जात इति प्रतीत्यर्थं प्रथमं भुज एवानीतः स यु
।न दि भुजकर्णयोगाच्छोध्यते नहि कर्णत्वेवावशिष्यत इत्युक्तं पपन्नं। अथ कोटिश्रुतिविवरे भुजे च ज्ञाते
स्तत्र वृत्तद्वयेनाह। भुजाद्वर्गितादीति।। सखे इति च।। भुजाद्वर्गितात्कोटिकर्णान्तराप्तं द्विधा कोटिकर्णा
न्तरेणोनयुक्तं। तदर्द्धे क्रमात्कोटिकर्णौ भवेतामिदं धीमतावेद्य सर्वत्र योज्यं।।१८।। सखे पद्म
तन्मज्जनस्थानमध्यं भुजः कोटिकर्णान्तरं पद्मदृश्यं।। नलः कोटिरेतन्मितं स्याद्यदंभो वदैवं समानीय पानीयमा
नं।।१९।। भुजाद्वर्गितात्कोटिकर्णान्तरेण भक्ताद्यदाप्तं तद्द्विधा स्थाप्यं कोटिकर्णान्तरेण क्रमाद्धीनं युतं वि
धाय तयोरर्द्धे कोटिकर्णौ स्यातामिदं बुद्धिमतावेत्य ज्ञात्वा सर्वत्र योज्यं। अथ मुग्धछात्रावबोधार्थं वि
षाणोदाहृतौ तक्षेत्रस्वरूपं अपरवृत्तेनाह।। सखे इति।। भोः सखे पद्मं च तत् मज्जनस्थानं च पद्मतन्म
ज्जनस्थाने तयोर्मध्यमंतरं भागः स भुजः दृश्यं च तत्पद्मं च कमलं तयोर्दृश्यो भागस्त कोटितुल्यं स्यात्।। भो
सखे एवं सति समानीय कीदृक् पानीयमानं वद।। उदाहरणं चक्रक्रौंचेति।। चक्रक्रौंचाकुलितसलिले
क्वापि दृष्टं तडागे तोयादूर्ध्वं कमलकलिकाग्रं वितस्ति प्रमाणं। मंदं मंदं चलितमनिलेनाहतं हस्तयुग्मे त
स्मिन्मग्नं गणक गणय क्षिप्रमंबुप्रमाणं।।२०।। भोः गणक क्वापि तडागे कमलकलिकाग्रं तोयादूर्ध्वं वित
स्तिप्रमाणं दृष्टं किंलक्षणं। अनिलेनाहतं अत एव मंदं मंदं चलितं सत् हस्तयुग्मे गत्वा मग्नमित्यपि दृष्टं। कीदृशे
तडागे।। चक्रवाकैर्बकैश्चाकुलितं मंदादोलितं सलिलं यत्र।। एवं सति क्षिप्रं मंबुप्रमाणं वद। अत्र न्यासः भुजः

र्गितः ४ कोटिकर्णान्तरेण लब्धं मूलं ८ एतद्द्विधा कोटिकर्णान्तरेण १/२ समच्छेदेनोनं युतं
सयुतं | १५/२ | १७/२ | अनयोर्लब्धावर्द्धे इति सूत्रेणार्द्धे | १५/४ | १७/४ | जातौ कोटिकर्णौ तत्र कोटि
स्तु जल गांभिर्यं नलः कोटिरेव मुक्तः कर्णः कमलनालकलिका। अत्रोपपत्तिर्द्वि

तीयस्तु आदितः। जले यत्पद्मं मज्जनस्थानं भूमिपर्यंतं सरलयष्टिकायां भिप्रायोस्ति स्यात्तले कम
लनालपर्यंतं यदंतरं स भुजः। नालं कोटिः। अथ भुजादिति कोटिकर्णयोर्वर्गान्तरपदं भुजो भवति
कोटिश्रुतिद्वयोरंतरांल्पदं बाहुरित्युक्तेः।। एवं भुजवर्गोऽपि कोटिकर्णान्तरं ज्ञातं भवति। अथ वर्गा
न्तरं राशिवियोगभक्तं इत्यादिना तस्मिन्वर्गान्तरे कोटिकर्णान्तरेण भक्ते सति यल्लब्धं स कोटिक
र्णयोर्योगः। अथ योगोन्तरेणोनयुतोऽर्द्धित इति संक्रमणविधिना कोटिकर्णावुत्पद्येते। तत्र या कोटि
रिस्त्येव जलगांभीर्यं स्यादित्युपपन्नं।। अथ कोटिखंडकर्णभुजे च ज्ञाते करणसूत्रं वृत्तम
द्विघ्नेति।। द्विघ्नघ्नतालोच्छ्रितिसंयुतं यत्सरोन्तरं तेन विभाजितायाः।। तालोच्छ्रितेस्तालसरोन्तरघ्न्या
उड्डीयमानं खलु लभ्यते तत्।।२१।। तालो वृक्षविशेषस्तस्योच्छ्रितिरुच्चयः द्विघ्नया तालोच्छ्रित्या संयु
तं तालसरोन्तरं तेन भक्तया स्तालसरोन्तरगुणितया तालोच्छ्रितेः आकाशायत्तं धावनं उड्डीयमानं ल
भ्यते। तालादूर्ध्वगतिमानं तत्स्यात्। उदाहरणं वृक्षादिति। वृक्षाद्धस्तशतोच्छ्रयाच्छतयुगे वापीं क
पिः कोप्यागादुत्तीर्याथ परो द्रुतं श्रुतिपथात्प्रोड्डीय किंचिद्द्रुमात्। जातैवं समतानयोर्यदि गता बुद्धि

101/2006 50

यमानं क्रीयत् विहङ्गेवक्षिपरिश्रमेःस्तिगणितेक्षिप्रंन तच इत्थमे॥२४॥मोःविहङ्गकोपिवानरःहस्तशतोछ्रया
नाला द्रुतिर्यत्तालमूलाद्धस्तशतद्वये वर्ते मानांवापि प्रायनथापरः॥कपिःद्रुतंशीघ्रं द्रुमावृक्षात्किंचित्प्रोड्डी
यश्चात्तिर्यथा कर्णमार्गमार्गण सूत्रमार्गमाश्रित्येर्थ॥वापिगमा द्रुतन राेवंसति नयोः कप्योर्गतैःसमताजा
ता तर्हि वृक्षाद्दुड्डिनमानं कियद्भवनाति क्षिप्रमाचक्ष्व यदितव गणितेसुमराम भ्यासोस्ति॥वृक्षोमहिरुह
स्तालो भूरुहः शाखीद्रुमःपादप इति॥ कपीशाखामृगःप्लवंगवानराःपर्यायाः न्यासः अथसरोंतरमी
दं २०० द्विनिघ्ना तालोछ्रिति २०० संयुतं ४०० अनेन ४०० तालसरोंतरघ्नातालोछ्रिति २०००० र्भक्ता
लब्धं प्लुड्डीयमानं हस्ता ५० एवं द्वयोर्जातासमगति ३०० अथवा भुजाद्वर्गितादि।
ति भुजः २०० वर्गितः ४०००० तालोछ्रयेण १०० न्नक्तः ४०० द्विधास्थौ तलोछ्रयेण
१०० नयुतः ३०० ॥४०० अर्द्धितः १५० २५० अत्र कोटिस्याः १५० दृश्य को १०० को
टिविशोध्यम्प्लुड्डीयमानं ५० एवं द्वयोर्जातासमगतिः ३०० एवं क्षेत्रदर्शनंअत्रोप

पत्तिः॥ यथात्रोदाहरणेदृश्यकोटिः १०० भुजः २०० समगति ३००
अत्र समगतिनामदृश्यपवाकोटिभुजयोर्यासमगतिस्तुल्यस्तस्मिन्युनर्हि
दृश्यकोटियुतेकर्णकोटियोगो ज्ञायते॥ ततोलाघवार्थं द्विगुणायादृश्यकोटि
भुजएव युतःक्रियते एवं कोटिकर्णयोगे ज्ञातेसति प्राग्वदनुपातः यद्घनेन ५०

103
0006

कोटिकर्णयोगेन ४०० दृश्य कोटिमितं १०० विवरं लभ्यते तर्हि भुजप्रमितेकिमिति ४००।१००।२०० अत्रय
दंतरंलभ्यते तद्वेवोड्डीयमानं स्यात्॥ अथवायो हि भुजोजातस्तस्यवर्गस्तेकोटिकर्णवर्गांतरं ज्ञायतेतथा
दृश्यकोरेवकोटिकर्णांतरंभवत्यतो वर्गांतरंराशिवियोगभक्तमित्यादिनातद्योगमानियततोयोगांत
रणोनयुतइत्यादि संक्रमणेन कोटिकर्णाविनेयौतत्रां।कोटिःस्यात्स्यांदृश्यकोध्यूनितायांसत्यांउड्डीयमा
नंज्ञायातइत्युपपन्नं॥ अथ भुजकोटियोगेकर्णेचज्ञातेकरणसूत्रं कर्णस्यवेगाद्धाति॥ कर्णस्यवर्गाद्वि
गुणाद्विशोध्योदोःकोटियोगःस्वगुणोस्यमूलं योगोद्विधामूलविहीनयुक्तःस्यातांतदर्द्धे भुजकोटिमाने
२३ स्वगुणोवर्गितःदोःकोटियोगःद्विघ्नात्कर्णस्यवर्गाद्विशोध्यः शेषस्यमूलंमहं स्थाप्यं अपदोःको
टियोगंद्विधास्थाप्यमूलेनपृथगतेनविहिनयुक्तंकृतातदर्द्धेक्रमणभुजकोटिमानेस्यातां॥ उदाहरणं
दशसप्तेति दशसप्तधिका कर्णस्त्र्यधिकाविंशतिःसखे भुजकोटियुतिर्यत्र तत्रतेमेपृथक्वद॥२४॥
न्यासः एवं यत्र कर्णः दशसप्ताधिकः सप्तदशामितइत्यर्थः भुजकोटियुतिस्त्र्यधिविंशतिमिता॥ तत्रमे
ममतेभुजकोटीपृथग्वद इति न्यासः

भुजकोटियोगस्यास्य २३ वर्ग ५२९ अयंकर्ण
स्य १७ वर्गा२८९ द्विगुणा ५७८ द्विशो
धितः शेषं ४९ अस्यमूलं ७ नेद्विस्थो भुजकोटि
योगो २३ सरहितः रहितः ७ १६।३० अर्द्धि
तः सन्जाते भुजकोटी ८।१५ क्षेत्रदर्श

नंच भीष्टराश्योर्वर्गयोगाद्विगुणघातेद्विगुणवर्गयोःशोधिष्यतेएवंक्षेतेकर्णस्यवर्गाद्वि

नाम लंबोभयपार्श्वभूखंडज्ञानार्थमीत्यर्थः ३७

भुजकोट्योर्वर्गयोगतुल्यो भवति तस्माद्द्विगुणाद्यदि भुजकोटिवर्गः शोध्यते तर्हि अवशिष्टो ऽन्तरवर्गो
भवति तस्य मूलं भुजकोट्योरंतरं तत्घातयोर्योगस्य पूर्वमेव ज्ञातत्वात्तो योगांतराभ्यां संक्रमणविधिना
भुजकोट्योर्ज्ञानं सुगममेवेत्युपपन्नं ॥ अथ दोष्कोट्योरंतरेकर्णे च ज्ञाते करणसूत्रं प्राग्गुक्तमपि भ
ग्यंतरेणोच्यते कर्णस्य वर्गादितिस्पष्टं कर्णस्य वर्गाद्द्विगुणाद्विशोध्यो दोष्कोटिविश्लेषकृतिस्त
दूर्ध्वं मूलं द्विधान्तरहीनयुक्तं स्यातां तदर्द्धे भुजकोटिमाने २५ उदाहरणं दोष्कोट्योरितिस्पष्टं
दोष्कोट्योरंतरं शैला: कर्णो यत्र त्रयोदश भुजकोटिपृथक्तत्र वदाशु गणकोत्तम: २३ न्यास: ७ १३
भुजकोट्यंतरं ७ कर्ण १३ अस्य वर्ग: १६९ अस्माद्द्विघ्नात् ३३८ भुजकोट्यंतरवर्गो शोधित:
२८९ शेषस्य मूलं १७ द्विधा दोष्कोट्यंतरेणोनयुतं १० । २४ अनयोरर्द्धे जाते दो: कोट्यौ ५ । १२ इति त्रौ

अथ ज्ञातभूमिके क्षेत्रे लंबज्ञानार्थं सूत्रं वृत्तं अन्योन्येति अन्योन्यमूलाग्रगसूत्रयोगाद्वेणुद्व
धे योगहृते वलंब: ॥ वंशौ स्वयोगेन हृतावभिष्टभूघ्नौ च लंबोभयत: कुखंडे ३७ वंशाद्वय
स्ये वधे परस्परगुणने योगेन वेणुद्वयोगेन हृते सति अन्योन्यमूलाग्रगसूत्रयोगाद्वलंब: स्या
त् अयमर्थ: प्रोक्तवेणुद्वयो: परस्परमूलपर्यंतं नीयमानेसूत्रेन यो: संपाताद्भूमिपर्यंतं यो लंब:
स भवतीति अथ लंबोभयपार्श्वे आबाधाज्ञानार्थमाह वंशाविति वंशौ स्वेष्टभूमानेन गुण्यौ स्व
योगेन वंशद्वयसंख्येकेन हृतौ संतौ यद्भवतौ तद्द्वयं लंबोभयपार्श्वे भूखंडे स्त: उदाहरणं आर्ययाह

105
2006

पंचदशेतिस्पष्टं पंचदशदशकरोच्छ्रययोर्वेण्वोरज्ञातमध्यभूमिकयो: इतरेतरमूलाग्रगसूत्र
योगलंबं वद मा च कुख्वे ॥ न्यास: वेण्वो १५ । १० वधः १५० वेण्वोरैक्येन २५ हृत: स नूलं

ज्ञो लंब: आबाधाज्ञानार्थं कल्पिते भू वेण्वोरंतरभू: ५ अनया ५ वंशौ १५ । १० गुणितौ वंशै
७५ । ५० योगेन २५ हृतौ लब्धे आबाधे ३ । २ एवं पुनर्दर्शिते अथवा

भू: १० प्रागुक्तवदाबाधाखंडे ६ । ४ अथवा भू: १५ प्रागुक्तवदाबाधे भूखंडे ९ । ६ अथवा वेष्टभू:
२० प्रागुक्तवद्भूखंडे १२ । ८ एवमन्येष्वंशे भूरधिका महति च स्वल्पे अनतउ कं सर्वत्र
लंब: स एव भवति गोत्रा कु: पृथ्वी पृथिवी भू: भूमिश्च रसा धरस्य इति पर्याया आबाध
बाधावा इतिरखंडमीति अत्रोपपत्ति: ॥ यावदिष्टं भूमिप्रकल्पनेनानुपात: यदि वंशयोगेन २५ वंशो १
लभ्यते तर्हि भूमितेनाबाधयोर्योजितेन ५ किमिति त्रिभूखंडे ज्ञायते २५ । १५ । ५ तथा च २५ । १० । ५ । ५ अथ लं
बाज्ञानार्थं पुनरनुपात: यदि भूमिते भूजे वंशो कोटिस्तर्हि भूखंडमिते भुजे किमित्यत्र वंशौ स्वाबाध
यां गुणितौ भूयत्र भुवा हृतौ फलं लंब: ५ । १५ । ५ । २ तथान्यत्र ५ । १० । ५ अनयोर्लाघवार्थं वेण्वोर्वधे स्वयोग
हृतेपि फलं तुल्यमेव स्यात् इत्युपपन्नं अथ लंब: स एवेत्यत्राचार्य लंबोपपत्तिं दर्शयति यदीति
यदि भूतुल्ये भुजे वंश: कोटिस्तर्हि भूखंडेन किमिति त्रैराशिकेन सर्वत्र प्रत्यय: अथ धूर्जौ दि
साना ऊनत्वा क्षेत्राणां स्वरूपमार्ययाह इष्टोद्दिष्टमिति धृष्टोद्दिष्टमृजुभुजं वाक्षेत्रे यत्रैक

तः स्वल्पा । तदीतरभुजयुतिरथवा तुल्या ज्ञेयं तदक्षेत्रं ॥ भोः शिष्याः तत्क्षेत्रं ऋजुभुजमपि शास्त्र
भुजमपि अक्षेत्रं ज्ञेयं किल लक्षणं धृष्ट न निःशंकेनाति वाचालतो यो दिष्ट पृच्छामि त्यर्थः ॥ किं तदित्य
त्राह ॥ एकबाहुतः स्वल्पा दितरभुजयुतिः स्वल्पा अपमर्थः ॥ कस्मिंश्चिच्चतुरस्त्रे च त्रिभुजे एकस्मादेव मह
तो भुजादितरेषां त्रिबाहूनां युतिर्यदि स्वल्पा वा त्र्यस्त्रे त्रिभुजे द्वयोर्युतिरेकबाहुतः स्वल्पा तुल्या वास्या
त् महद्भुजसमा वा स्यात् इत्यर्थः तदक्षेत्रं क्षेत्राभासमित्यर्थः ॥ अत्रोदाहरणमनुष्टुभाह ॥ चतुरस्त्रेति ॥ च
तुरस्त्रे द्विषट् त्र्यर्का भुजा त्र्यस्त्रे त्रिषट् नवा ॥ उद्दिष्टं यद्धृष्टेन तदक्षेत्रं निगद्यते ॥ यत्र चतुरस्त्रे द्विषट् धृष्टो
द्यर्का भुजा भवंति ~~त्र्यस्त्रं~~ त्र्यस्त्रे त्रिषट् नवा भवति । तदक्षेत्रं कथयेत् ॥ न्यासः २ ६ अत्रेत
रेषां भुजानां २।३।६ युतिः ११ महद्भुजादस्मात् १२ अल्पा भवति । अथ त्र्यस्त्रन्यासः
अत्रेतरभुजयुतिः ९ महद्भुजेनानेन ९ समा उभयमप्यक्षेत्रं ॥ अथाचार्योक्तोपपत्तिप्रकारा
तरं दर्शयति त्वमीति ॥ अनुपपन्नोक्षेत्रे इति अत्रोपपत्तिः ॥ क्षेत्रदर्शनार्थं धृष्टोद्दिष्टभुजांगुलैः यो
वलक्षरसलाकाः प्रसार्यंते तावत्परस्परभुजानां संयोगोपि न भवति तुंदिलमैथुनन्यायेन लघुभाजां म
हद्भुजायाम्यां प्रसंजन्नाम ध्यात्वोत्तारितास्ति दृष्टांति ॥ एवं तदैव स्याद्यदा महद्भुजापेक्षया तदितरभु
जानां योगोल्पः स्यात् तत्समो वा स्यात् ॥ अतो महद्भुजतारतम्ये तेन तद्भुजकल्पने ह्यत्रत्व
... त्वमित्युपपन्नं ॥ ४ ॥ एवमनेकशो जात्यत्र्यस्त्रक्षेत्रानुक्त्वा नीप्रासत्रिभुजमि ५२

त्युपपत्तिसंगेन क्षेत्रफलानयनार्थं सूत्रमार्याद्वयमाह ॥ त्रिभुजे इति ॥ तथा स्वाबाधेति ॥ त्रिभुजे भु
जयोर्योगस्तदंतरगुणो भुवा हृतो लब्ध्या ॥ द्विस्था भूरूनयुता दलिता बाधे तयोः स्यातां ॥ ॥ स्वाबाधा
भुजकृत्योरंतरमूलं प्रजायते लंबः ॥ लंबगुणं भूम्यर्धं स्पष्टं त्रिभुजे फलं भवति ॥ त्रिभुजे क्षेत्रे त्र्या
त्मके क्षेत्रे भुजयोः संमुखयोर्योगस्तयोरेवांतरगुणः कार्यस्तदनु त्रितयभुजोपलक्षितया भुवा हृतः
पदत्रद्वानेन द्विस्था भूमिरूनयुता दलिता सति अवलंबोभयपार्श्वयोः भूमाने स्यातां ॥ तयोर्भुजयोरा
बाधे स्यातामित्यर्थः ॥ अत्राबाधाशब्दोऽवधिवाचकस्तेन क्षेत्रमस्तकात् ... स्तात् लंबो भूमौ यत्र लग
ति तं प्रदेशमवधि कृत्वोभयतो ये भुखंडे तत्तद्भुजयोर्भूविभागोपलक्षितो आबाधे स्यातामिति भा
नुभट्टः ॥ अथ लंबज्ञानार्थमाह ॥ स्वाबाधेति ॥ निजबाधाभुजकृत्योरंतरमूलं यत्स लंबो भवति
अथ लंबगुणं भूम्यर्द्धं त्रिभुजे क्षेत्रे स्पष्टं फलं भवति ॥ स्पष्टमित्यनेन कुत्रचित् क्षेत्रे अस्फुटमपि फल
मानियं तमस्ति सूचितं तदग्रे दृश्यमित्यर्थः ॥ उदाहरणं ॥ क्षेत्रे महीति स्पष्टं ॥ क्षेत्रे मही मनुमिता त्रिभु
जे भुजौ तु यत्र त्रयोदशतिथिप्रमिते तौ चयस्य ॥ तत्रावलंबकमितं कथयावबाधे क्षिप्रं तथा समं
कोष्ठमितिं फलाख्यं ॥ ७ ॥ अत्र कोष्ठकामितिरीत्यनेन क्षेत्रफलोपपत्तिरेव सूचिता ॥ तथाहि क्षेत्रे ये भुजा
भवंति तन्मिता हस्ता प्रकल्प्य तन्मूलं प्रयत्नेत्रांतरलीर्यगुर्ध्वरेखाः प्रसार्यं तत्र कैकामिता यावंतः कोष्ट
काः भवंति तावद्हस्तात्मकमेव क्षेत्रमित्यर्थः ॥ न्यासः १३

१५ अत्र भुजयोर्योगः २८ भुजांतरेण २ गु

107 2006 53

णिताः ५६ भुवा १४ हृतं लब्धेन ४ हीनस्या भूमि १४ ऊना युता १०।१८ अर्द्धिता जाते आबाधे ५।९ स्वाबाधा
वर्गः २५ भुज १३ वर्ग १६९ अनयोरंतरं १४४ मूलं जातो लंबः १२ एवं स्वाबाधाभुजौ ९।१५ अन
योर्वर्गयोः ८१।२२५ रंतरस्य १४४ मूलं जातो लंबः १२ अथवा भौम्यर्द्धं ७ लंबेन १२ गुणितं ८४ संजातं त्रि
भुजक्षेत्रफलं ८४ क्षेत्रदर्शनं

अथ पुनरपि कल्पनांतरेणोदाहरणमाह दशेति
दश दश सप्तदशप्रमौ भुजौ त्रिभुजे यत्र नवप्रमा मही ॥ अबधे वद लंबकं तथा गणितं गा
णितिकाशु तत्र मे ॥ भो गणितक गणितप्रवर यत्र भुजौ १०।१७ भूः ९ तत्र त्रिभुजे
क्षेत्रे लंबं अबधे आबाधे गणितं क्षेत्रफलं च शीघ्रं वद इति अत्रापि त्रिभुजे भुजयोरितिसूत्रेण सि
सिद्धिः न्यासः



भुजयोर्योगः २७ तदंतरेण ७ गुणः १८९ भुवा ९ हृतः लब्धेन २१ हीनस्था ९
नायुता च भव न्यस्य भुवा फलं न गच्छति अतोधिकादस्मात् फलात् २१ भूरेवा ९ पतिता शेषं
१२ तदर्द्धं ६ ऋणगता आबाधा ६ विपरीता दिक्षु लंब इत्यर्थः अथ लब्ध २१ भूः ९ युता ३० अर्द्धिता १५
जाता द्वितीया आबाधा १५ स्वाबाधाभुजौ ६।१० एतयोः कृत्योः ३६।१०० रंतरस्य ६४ मूलं ८ जातो लंबः
पुनः स्वाबाधाभुजौ १७।१५ तत्कृत्योः २८९।२२५ रंतरं ६४ मूलं ८ लंबः स एव ९ भूम्यर्द्धं [illegible] लंबेन गु
णितं ३६ स्वच्छेदेनाप्तं ३६ स्पष्टं भूफलं क्षेत्रदर्शनं

अथ चतुर्भुजफलानयनार्थं
माह सर्वदोरिति ॥ सर्वदोर्युतिदलं चतुःस्थितं बाहुभिर्विरहितं च तद्वधात् मू

लमस्फुटमीदृक् चतुर्भुजे स्पष्टमेवमुदितं त्रिबाहुके ॥ सर्वदोर्युतिः सर्वभुजैक्यार्द्धं स्थानच
तुष्टये स्थाप्यं तदनुक्रमेण बाहुभिर्विरहितं कार्यं एवं कृते यानि शेषाणि तेषां वधस्तस्य यन्मूलं
चतुरस्र चतुर्भुजे क्षेत्रे अस्फुटं फलं भवति ॥ वास्तवक्षेत्रफलात् किंचिन्मात्रमित्यर्थः ॥ त्रिभुजे तु स्पष्टमेवो
दितं अत्रोपपत्तिः ॥ तत्र त्रिभुजे त्रयाणां भुजानां योगार्द्धं त्रिधा स्थापितं भुजैरूनितं सति यच्छे
षत्रयं भवति तद्योगे क्रियमाणे सर्वभुजानां योगार्द्धमेव भवति ॥ अथ शेषत्रयवधो शेषयोगेन गुणिते
सत्येकलंबदलवर्गभूम्यर्द्धवर्गयोर्घातेन तुल्यं भवति स च वर्गराशिर्यतो वर्गेण वर्गे गुणिते वर्ग एव
भवति ॥ अथ तस्य मूले गृहीते लंबभूम्यर्द्धयोर्घातो लभ्यते तदेव क्षेत्रफलं भवत्यतस्त्रिभुजे वा
स्तवफलं लभ्यते ॥ अथ चतुर्भुजे तु पूर्ववच्छेषयोगार्द्धेन शेषवधे गुणिते सति वर्गराशिर्जायते कर
णिगत एव भवति तस्यासन्नपदं क्षेत्रफलं भवत्येव परंतु न वास्तवं यतस्तस्मिन् क्षेत्रफले ल
ब्धे सति कुमुखयोगार्द्धेन लभ्यते इत्युपपन्नं ॥ उदाहरणं ॥ भूमिश्चतुर्दशेति भूमिश्च
खव तुर्दशकरा मुखमेकसंख्यं बाहू त्रयोदशद्वादशकरसंमितौ च ॥ लंबोपि यत्र रविसंख्यकरः
वत तत्र क्षेत्रे फलं कथय ना ॥ कथितं पदाद्यैः ॥ भो गणक यत्र भूमिरधस्तनसूत्रं चतुर्दशक
रं मुखं ऊर्ध्वसूत्रं नवहस्तमितं ॥ बाहू दक्षिणोत्तरसूत्रे त्रयोदशद्वादशमिते ॥ लंबोपि द्वादशसं
ख्यः ॥ तत्र क्षेत्रे पदाद्यैराचार्यैः फलमुक्तं तत्कथय ॥ अनवस्थितत्वान्न लभ्यते इत्यर्थः ॥ न्यासः

109
2006
54



सर्वेबाहवः १४।१२।२०।१३ एषां योगा ५९ र्द्धं २९ स्थान चतुष्टयस्थं २९।२९।२९।२९
बाहुभिः १४।१२।२०।१३ क्रमेण रहितं शेषाणा १५।१७।९।१६ माहति १९८०० अस्या
आसन्नमूलं किंचिन्न्यूनमेकचत्वारिंशाद्धिकं शतं १४१ इदमस्मिन् क्षेत्रे ऽस्फु
टं यतः पूर्वमुक्तं च ॥ अथ पूर्वोक्त त्रिभुजस्य फलानयनार्थं न्यासः

अत्र सर्वदोर्युति दलमित्यनेन प्रकारेण क्षेत्रफलं साध्यते यथा सर्वभुजाः १३।
१४।१५ एषां योगा ४२ र्द्धं २१ इदं चतुःस्थापितं भुजैः १३।१४।१५ र्वियुक्तं शेषाणि ८।७
।६।२१ अत्राह चतुर्थस्य भुजस्याभावात् २१ स्थाप्यवशेषाणि चतुर्थस्थाने तु सर्वदोर्यु
तिदलमेव तस्य शेषत्रयस्य योगेन सम २१ वर्त्तते ऽतः शेषत्रयस्य परस्परा
हति ३३६ स्वस्या ऽ।७।८ योगे २१ न गुणितं ७०५६ अस्य मूलं भूफलं ८४ अथवेमानि शेषा
णि ऽ।७।८।२१ एषां वधः ७०५६ अयं लंबभूम्यर्द्धं १२।७ रनयो १४४।४९ र्घातेन तुल्य एव ७०
५६ अस्य मूलं क्षेत्रफलस्य तुल्यं ८४ तथा लंबभूम्यर्द्धघातश्च ८४ अत एतद्वास्तवं फलं चतुरस्रे
तु शेषघाते कृते भूमिमुखयोगार्द्धवर्गलंबवर्गयोर्घाते न भाव्यं तन्न भवति विज्ञात्वा
ऽस्पष्टमित्यनेनोपपत्तिरास्फुटिदर्शिता ॥ अथ चतुरस्रक्षेत्रे फलस्य स्थूलत्वं सहेतुकं सार्द्धवृत्ते
नाह ॥ चतुर्भुजस्येति ॥ तद्घातैर्वाचेति ॥ चतुर्भुजस्यानियतौ हि कर्णौ कथं ततो ऽस्मिन्नियतं फलं ५४

स्यात् ॥ प्रसाधितौ तच्छ्रवणौ यदाद्यैः स्वकल्पितौ तावितरत्र न स्तः ॥ ७ ॥ तथैव बाहुष्वपरत्र कर्णावने
कधा क्षेत्रफलं ततश्च ॥ ८ ॥ अस्य यानामनेकार्थत्वात्पक्षि ॥ द्वियतौ हेतो श्चतुर्भुजस्यानियतौ कर्णौ न
भवतस्ततो ऽस्मिन् चतुर्भुजे नियतं फलं कथं स्यात् ॥ फलस्य कर्णवशागत्वात्तदनियमे फलस्यानियम
इति भावः ॥ आद्यैराचार्यैर्यौ तिच्छ्रवणौ चतुरस्रे साधितौ तावेवेतरत्र नामचतुरस्रप्रकारान्तरेष्वेषु
न संभवत इत्यर्थः ॥ तेष्वेव बाहुषु संकोचविकाशाभ्यामपरौ कर्णौ स्यातां ततः क्षेत्रफलं पुनस्तेष्वेव
बाहुष्वपरौ च कर्णौ ॥ इति श्रवणभेदादनेकधा क्षेत्रफलं भवन्ति ॥ अत्रोपपत्तिमाचार्य एव निरूपय
ति ॥ तथाहि ॥ चतुर्भुजे हि एकान्तरकोणावाक्रम्य निविश्यमानौ ॥ तत्संलग्नकर्णं संकोचयतः ॥ इतरौ तु ब
हिः प्रसरन्तौ स्वकर्णं वर्धयतः ॥ अत उक्तौ कं ॥ तेष्वेव बाहुष्विति ॥ अथैतदेव दृढीकुर्वन्नुत्तरवृ
त्तेनाह ॥ लंबयोः कर्णयोरिति ॥ स पृच्छकः इति च ॥ लंबयोः कर्णयोर्वैकमनिर्दिश्यापरान्क
थं पृच्छत्यनियतत्वे ऽपि नियतं वापि तत्फलं ॥ ७ ॥ स पृच्छकः पिशाचो वा वक्ता वा नितरां ततः ॥ यो न वे
त्ति चतुर्बाहुक्षेत्रस्यानियतां स्थितिं ॥ ७ ॥ लंबयोः कर्णयोर्वा एकमनिर्दिश्यैकस्वरूपमप्यनवधु
ध्य कथं पृच्छति ॥ अनयत्वे ऽपि नियतं फलं यः पृच्छति सः पृच्छकः पिशाचः ततो वा वक्ता नितरां पिशा
चः ॥ न नु वक्तापि नितरां पिशाचः कथं निरूपितस्तत्राह ॥ यश्चतुर्भुजस्यानियतां बिनियमां कर्ण
लंबादिसंस्थानं नेजानन्नपि सावलेपतया तं पिशाच एवेत्यर्थः ॥ अपसव्यविषमचतुर्भु
वेद

जायतादीनां मिष्टफलान्याने तुं स्फूटं स्यार्द्धं यतद्वयेनाह ॥ इष्टाश्रुतिरिति ॥ अतुल्यकर्णेति ॥ चतुर्भु
जेऽत्र त्रेति ॥ इष्टाश्रुति तुल्यचतुर्भुजस्य कल्प्याथ तद्वर्गविवर्जिताया ॥ चतुर्गुणा बाहुकृतिस्तस्याः यं
मूलं द्वितियं श्रवणप्रमाणं ॥ ७ ॥ अतुल्यकर्णाभिहति द्विभक्ता फलं स्फुटं तुल्यचतुर्भुजे स्यात् ॥
समश्रुतौ तुल्यचतुर्भुजे तु तथायते तद्भुजकोटिघातः ॥ ७ ॥ चतुर्भुजेऽन्यत्र समानलंबे लंबेन निघ्नं
कुमुखैक्यखंडं ॥ तुल्यचतुर्भुजस्य तुल्याः समाश्चत्वारो भुजा यत्र तत्तथा ॥ भुजस्य क्षेत्र
स्येष्टकः कर्णः कल्प्यः ॥ अथ चतुर्गुणा बाहुकृतिस्तद्वर्गेणेष्टश्रुतिवर्गेण वर्जिता सति यास्या
स्तदीयं मूलं द्वितीयकर्णप्रमाणं स्यात् ॥ अथ तुल्यचतुर्भुजमपि द्वेधा तुल्यकर्णमतुल्यकर्णं चे
ति तत्र संकोच्यमानान्यतरकोणद्वयं तुल्यकर्णं तथा संकोच्यमानान्यतरकोणद्वयमतुल्यक
र्णं तत्रादावतुल्यकर्णस्य तुल्यचतुर्भुजस्य फलार्थमाह ॥ अतुल्येति ॥ अतुल्यकर्णयोरभि
हतिर्गुणनं द्विभक्तं स तुल्यचतुर्भुजस्येष्टफलं भवति ॥ अथ तुल्यकर्णस्य तुल्यचतुर्भुजस्य
फलार्थमाह ॥ समेति ॥ समकर्णौ समचतुर्भुजे तथा आयते दीर्घे पि क्षेत्रे तद्भुजकोटिघातः क्षेत्र
फलं भवति ॥ अथ विषमचतुर्भुजस्य फलार्थमाह ॥ चतुर्भुजेति ॥ अन्यत्र नाम विषमे चतुर्भुजे समानलं
बे क्षेत्रे कुमुखैक्यखंडं भूमिवदनयोगार्द्धं लंबगुणं सत्फलं भवति ॥ ७ ॥ अथैषामुदाहरणानि क्षेत्र
मिति ॥ क्षेत्रस्य पंचकृतितुल्यचतुर्भुजस्य कर्णौ ततश्च गणितं गणक प्रचक्ष्व ॥ तुल्यश्रुतेश्च खलु त

स्य तथायतस्य यद्विस्तृतिः रसमिताष्टमितं च दैर्घ्यं ॥ ७ ॥ भोः गणक पंचकृतिमितस्य २५ तुल्यचतुर्भु
जस्य क्षेत्रस्य कर्णौ गणितं नाम क्षेत्रफलं च वद न्यासः अत्र तत्कृत्यो योगपदं इति प्रसि
द्धप्रकारेणात्र भुजौ २५।२५ अनयोः कृत्योः ६२५।६२५ २५ ॥ योगः १२५० पदं सलाभावा
त्करणीगतत्वाच्च भुजकर्णः १२५० अस्यासन्नपदं किंचिदधिकं पंचत्रिंशत् ३५ भुजको
टिघातः फलं ६२५ अथातुल्यकर्णपक्षे आह ॥ त्रिंशन्मितं कमेकश्रवणं प्रकल्प्य ३० प्रसादय
तो ॥ इष्टाश्रुतिः ३० अस्या वर्गेण ९०० बाहुकृतिः ६२५ चतुर्गुणा २५०० वर्जिता १६०० तन्मूलं ४० अयमे
व द्वितियकर्णः ॥ एवं कर्णौ ३०।४० अनयोरभिहति तथा च क्षेत्रदर्शनं अथातुल्य
कर्णाभिहतिरित्यादिना फलं ॥ यथातुल्ययस्य कर्णौ ३०।४० अनयोराहति: १२००
द्विभक्ता ६०० जातं फलं तत्र कुत्रेत्याह ॥ यत्र चत्वारो भुजाः पंचविंशतिमिताः कर्णौ
च ३०।४० प्रकारांतरेणाविषमकं कर्णं दर्शयति ॥ यथेष्टाश्रुतिः १४ तद्वर्गः १९६ अनेन चतुर्गुणा
बाहुकृतिरूना २३०४ तन्मूलं जातं द्वितियकर्णमानं ४८ एवमतुल्यकर्णयो १४।४८ हेरो ६७२
अर्द्धिता जातं तत्र फलं ३३६ यत्र चत्वारो भुजाः २५ एकः कर्णो १४ न्यश्च ४८ क्षेत्रदर्शनं 
अथोद्दिष्टस्यायतस्य न्यासः अत्रापि तद्भुजकृत्यो ६४।३६
१०० योगपदं कर्णः १० तथा भुजकोटिघातः फलं ४८ अथ स

113
2006
56

मानलंबस्य विषमचतुर्भुजस्योदाहरणं वृत्तेनाह ॥ ७ ॥ क्षेत्रस्येति ॥ क्षेत्रस्य यस्य वदनं मदनारितुल्यं विश्वं
भरा द्विगुणितेन मुखेन तुल्या ॥ बाहू त्रयोदशनरवप्रमितौ च लंबः सूर्यैर्मितस्त गणितं वद तत्र किं स्या
त् ॥ मदनारिः शिवस्तत्तुल्यं एकादशमितं यस्य क्षेत्रस्य मुखं विश्वंभरा भूमिर्द्विगुणमुखसमा द्वावि
शतिमिता भुजौ त्रयोदशविंशमितौ च लंबो द्वादशमीतस्य क्षेत्रफलं किं स्यात् इति न्यासः

अत्र सर्वदोर्युतिदलमीत्यादिनाऽवास्तवं फलं यथा सर्वदोष्णा ११।२२।१३।२० युतिदलं
३३ चतुःस्थितं क्रमात् बाहुभिः ११।२२।१३।२० हीनं शेषाणां २२।११।२०।१३ परस्पराह
तिः ६२९२० अस्याः मूलं जातमस्फुटफलं २५० स्फुटफलं तु लंबेन निघ्नमित्यादिना ११ २२ व
दनं चे ११ अनयोरैक्यार्धं ३३ इदमेव कुमुखैक्यखंडं एतल्लंबेन १२ गुणितं स्वछेदहृतं तदा जा
तं वास्तवं फलं १९८ अथ त्र्यंतरेण फलस्योपपत्तिः दर्शनाह ॥ क्षेत्रस्येति ॥ क्षेत्रस्यास्य
खंडनये क्रियमाणे क्षेत्रत्रयं भवति तत्र पार्श्वद्वयस्थे त्र्यस्रे मध्यस्थं लंबद्वयावधि चतुरस्रं
क्षेत्रं एषां पार्थक्यफलानि ॥ यथा लंबः कोटिः भुजः कर्णश्च तल्लग्नयोरंतरं भूखंडं तत्र कोसिधिभु
जः स्यादेव एतान्यस्योभयविषमस्रौदाहरणं प्रदर्शयामः न्यासः

त्योरिति कोटिः ५ अस्याः कृतिः २५ भुजेस्ति श्व १४४ अनयोर्योगः १६९
कर्णः १३ दोष्कोटिवर्गयोर्विवरादित्येन कोटिरप्याप्यति ॥ अथ द्वितीयं त्र्यस्रं

कर्ण २० । १२ वर्गयोः ४०० । १४४ रंतर २५६ मूलं कोटिः १६ अस्यो हं अस्य उपरि कर्ण भूजानयः एवं प्रथ
मत्र्यस्रे कोटिकर्णभुजाः १६।२०।१२ द्वितीये ५।१३।१२ अथ लंबाकर्णज्ञानाय कर्णाश्रितं बद्धाना
ति मपेककर्णाद्वितयकर्णज्ञानाय च सूत्राणामनेकत्वानावहुदाहरणांतरमाह पंचाशदीति पंच
शदेकि सहितावदनं यदियं भूः पंचसप्ततिमिता च मितोष्टषष्ट्या सव्यो भुजो द्विगुणविंशतिसंमि
तोन्यतस्मिन्फलं श्रवणलंबमितिप्रचक्ष्व ७ यद्यंवदनमेकसहिताः पंचाशत् ५१ तथा भूः पंचस
प्तमिता ७५ तथाष्टषष्ट्या प्रमितः सव्यो भुजः ६८ अन्यो दक्षिणभुजो द्विगुण्या विंशतिमितौ चत्वारि
शत् ४० तत्र क्षेत्रे श्रवणलंबमाने क्षेत्रे फलं प्रचक्ष्व न्यासः



अथ ज्ञातलंबस्य ले
फलं मनियतं नियतं चेति विशदयन्नाह माहज्ञाते लं
बइति ज्ञाते लंबे श्रवण
भुजौ तु लंबः फलं स्यान्नियतं च तत्र ७ अथ लंबज्ञाते
श्रवणोपि ज्ञायते श्र
वौ ज्ञातायां लंबोपि ज्ञायते तत्रैव तयोर्नियतत्वे फलं नियतमेव कर्णस्यानियतत्वे लंबोप्यनियतो एव
अथ लंबज्ञानार्थं क्षेत्रव्यवस्थामुत्तरार्द्धेनाह चतुर्भुजांतइति ७ चतुर्भुजांतस्त्रिभुजे च लंबः प्रागु
क्तौ कर्णभुजौ महि भूः चतुर्भुजमध्ये वर्तमाने त्रिभुजे च लंबः प्राग्वज्ज्ञातस्त्रिभुजे भुजयोर्योगि
इत्यादिज्ञानेयः अथ तत्र भुजौ तु कर्णभुजौ ज्ञेयौ मही भूः अयमर्थः त्रिभुजे भुजयोर्योग इत्यत्र भुज
द्वयमयेक्षितं तत्रैकस्तु भुजो स्त्येवान्यस्तु भुजस्थानापन्नः कर्णः इति तुल्या भुजद्वयं वर्तत एवेत्यर्थः

115/2006

अथात्र न्यासः अत्र सव्यभुजाग्नाद्दक्षिणभुजमूलगामी कल्पितः कर्णः ७७ स चांतर्व
र्तिनि त्रिभुजे एकोभुजः सव्यभुजो द्वितियभुजश्च अथ लंब ज्ञानाय भुजयो ६८।७७ योगः १४५ तदंतरे
ण ९ गुणितः १३०५ अस्य भुव ७५ भागो नग छतीति कृत्वा छेद एव स्थितः १३०५ छेदांशो पव
र्त्तनाभि १५ र पवर्त्यन्यासः ८७ अनेन स्थानद्वये भू ७५ हीनयुता २८८ ४३२ दलितौ २८८ ४३२
द्वाभ्याम पवर्तितेजाते आबाधे १४४ २३१ स्वाबाधा भुज १४४ ५८ स्याबाधा १४४ ५८ हत्ये
२०७३६ ४६२४ रंतरसमछेदे २६८९ अस्य मूलं जातो लंबः ३०८ लंबगुणेभूम्येहमिन्ना
२५ दिन ३०८ स्पष्टं क्षेत्रफलमीदं २६ २३१० क्षेत्रदर्शनं द्वितीयाबाधातद्भुजयो
जातो २३११ ७७ पि स एव लंबः अस्मिन् लंबे ज्ञाते कर्णज्ञान र्थं सूत्रं यल्लंबलंबाश्रि
मध्ये व लैबलंबोश्रितबाहुवर्गविश्लेषमूलं कथिताबधासा तदूनभूवर्गसमन्वि
तस्य यद्वा व वर्गस्य पदं स कर्णः ॥ छ ॥ लंबस्य लंबाश्रितबा हुश्च तयोर्वर्गविश्लेष
मूले य त्सा यथा आबाधा कथिता नदूनाया भुवो वर्गसमन्वितस्य यन्मूलं स कर्णः यथा लंबः ३०८
तदाश्रितो बाहुः ६८ अनयोर्वर्गौ ९४८६४ ४६२४ अनयोः समछेदांतरं २०७३६ तन्मूलं १४४
यमेवपधासैव अनयो १४४ ना भो ७५ जोतोन द्वितीयाबाधा २३१ अधास्य वर्गः ५३३६१ लंब व
र्गश्च ९४८६४ अनयोर्योगः १४८२२५ स्व छेद नेन २५ भक्तः लब्धानि रूपाणि ५९२९ अस्य मूलं जातः
२५

र्णः ७७ अथ द्वितीयकर्णज्ञानार्थं सूत्रं वृत्तद्वयेनाह ॥ इष्टो त्रेति ॥ छ ॥ इष्टोत्र कर्णः प्रथमः प्रकल्प्यः त्र्य
स्त्रेतु कर्णोभयतः स्थिते ये ॥ कर्णं तयोः क्ष्मामितरौ च बाहू प्रकल्प्य लंबावबधे च साध्ये ॥ छ ॥ आब
धयो रेककुपस्थयोर्यत्स्यादंतरं तत्कृतियुतस्य ॥ लंबैक्यवर्गस्य पदं द्वितीयः कर्णो भवेत्स
र्वचतुर्भुजेषु ॥ छ ॥ अत्रास्मिन् भुजे क्षेत्रे प्रथम इष्टकर्णः प्रकल्प्यः अथ तस्मिन् कल्पिते सति क
र्णोभयतः स्थिते ये त्र्यस्रे क्षेत्रे तयोः क्ष्मा भूमिः कर्णं प्रकल्प्या नाम यः कर्णः कल्पितः तन्मिते भूमि
द्वयोरपि त्र्यस्रयोः कल्प्ये त्यर्थः ॥ तथेतरौ बाहू प्रकल्प्य लंबौ अवधे च साध्ये पूर्वोदिता एव क्षे
त्रे सव्यभुजाग्राद्दक्षिणभुजमूलगामी यः कर्णः स मया प्रतिमितः ७७ कर्णः कल्पितो भूत् तस्मा
दुभयपार्श्वयोः त्र्यस्रक्षेत्रे उत्पन्ने तयोर्भूमि तु इष्टकर्णतुल्यैव कर्णो भूमि स्थानापन्नः तथैक
स्मिन्न त्रिभुजे भुजयोर्योग इत्यादि त्र्यस्रे यन्मूरव दक्षिणबाहुश्च द्वौ बाहुभवतः अपरस्मिन् त्र्यस्रे द
भूमि सव्यभुजौ बाहुभवतः तस्मिन् त्रिभुजे भुजयोर्योग इत्यादिना आबाधे भुजौ चानयने इत्य
5 र्थः अथाबाधयोरिति एककुस्थयोरेकादिगतयोराबाधयोर्यदंतरं भवेत् तत्वर्गयुतस्य प्र
गानितलंबद्वयैक्यवर्गस्य यत्पदं मूलं स कर्णः ॥ सर्वचतुर्भुजक्षेत्रेषु द्वितीयकर्णो भवेत् ॥ उदाहरणं
तत्रैव चतुर्भुजे सव्यभुजमूलगामिनः कल्पितमीदं मानं ७७ तत्कर्णरेखावच्छिन्नस्य क्षेत्रस्य मध्ये क
र्णरेखा भयतो ये त्र्यस्रे उत्पन्ने तत्र प्रथमत्र्यस्रं साध्यते तत्र कल्पितकर्णमीतैव भूः ७७ द्वयोरिव मे

117
2006
58

लघू: ११भूजौ ६१।८० त्रिभुजे भुजयोर्योग इत्यादिना भुजयो ५१।८० योग: ९१ अयमनयोरंतरेण ११ गुणि
त: १००१ भुवा ११ हृत: लब्धा १३ अनया हिस्था भु ११ रूना युता ७८।१०४ दलिता चु जाते आबाधे ३२।६५
अथ लंबनयनार्थं स्वाबाधाभुजौ ३२।६० अनयो: वर्ग १०२४।१६०० अंतरस्य मूलं जातो लंब: २४ पुन
राबाधाभुजौ ३२।६८ अनयोर्वर्गौ १०२४।४६२४ अंतरं ३६०० स्य मूलं लंब: ६० एवमेवाबाधाभुजौ
६५।५१ अनयोर्वर्गौ २०२५।२६०१ तस्य ५७६ मूलं २४ लंब: तथा च स्वाबा ३२ ६८ धा भु तयो
१०२४।४६२४ रंतरस्य ३६०० पदं जातो लंब: स एव ६० अथैकैकपार्श्वयोराबाधयो ४५।३२ रंतरं
१३ लंबसंपातांतरमीत्यर्थ: अस्य वर्ग १६९ लंबैक्य ८४ वर्गे ७०५६ युत: ७२२५ अस्य मूलं जातो
द्वितीयकर्ण: ८५ एवं क्षेत्रदर्शनं।  अत्र त्र्यस्रे तु कर्णो भयत इत्यादि वक्ष्यमाण
विधिना जातं क्षेत्रफलं अत्रोपपत्ति: तत्र प्रथमसूत्रोपपत्तिस्तु प्रथमसूत्रव्या
ख्यानादेवावगम्यते। अथाबाध पोरिति। त्र्यस्रद्वयस्य या कर्णमिता भूमि
कल्पितस्तत्स्या भुभयक्षेत्रे लंबसंपा तचिन्हयोर्यदंतरं तत्किं यन्मितमि अपेक्षायां लं
बचिन्हद्वयात् स्वस्वतो दक्षिणतो वा कर्णाद्युद्भय तोपि आबाधे तयोर्यदंतरं तदेव लंबचिन्हद्वयोरं
तरं भूमिर्भुज: लंबैक्यमिता कोटिस्तद्वर्गयोगपदं द्वितीयकर्ण: स्यादित्युपपन्नं॥७७॥ अथेष्टकर्णक
ल्पनेवि शेषास्तित्वसूत्रं सार्द्धवृत्तेनाह॥ कर्णाश्रितस्वल्पेति। तथान्यं लंबेति च। कर्णाश्रितस्व ५८

ल्पभुजैक्यमुर्वीं प्रकल्प्य तच्छेषभुजौ च बाहू॥ साध्योवलंबो थतथान्यकर्ण: स्वोर्व्या: कथंचि
द्रवणो न दीर्घ:॥७॥ तदन्यलंबान्न लघुस्तथेष्टं ज्ञात्वेष्टकर्ण: सुधिया प्रकल्प्य:॥७॥ कर्णाश्रितौ यो
स्वल्पभुजौ तयोरैक्यं यन्नामेव भूमिं प्रकल्प्य: शेषभुजौ बाहू प्रकल्प्यावलंब: साध्य:॥ इदं
त्रिकोणं चतुर्भुजं त्वेकांतरकोणयोराकाम्य संकोच्य मानं त्रिभुजत्वमेति। तत्र प्राग्वत् त्रिभुजे भु
जयोर्योग इत्यादिना लंब: तथा पर: कर्णश्च पूर्वं कथित एव चिन्त्य: सा श्रुति स्वल्पं: भुजैक्यरूप
यास काशात: कथंचिन्न दीर्घ नाम कदाचिदपि पृथ्वीव्यपेक्षया न दीर्घेत्यर्थ:। एवं तथा तदा
नीलंबानुसारिय: श्रवण: स लंबान्न लघु:॥ लंबापेक्षया नाल्प इत्यर्थ: एवमिदं तस्य यातं
नुसारं ज्ञात्वेष्टकर्णो बुद्धिमतां प्रकल्प्य:। एवमत्र लघुभुजौ ५१।८० अनयोरैक्यं ९१ इयमेव ९१

भुजौ च ६८।७५ आताभ्यां त्रिभुजे भुजयोरित्यादिना साध्यते। यथा भुजौ ६८।७५ अनयोर्योग: १४३ भु
जांतरेण गुणित: १००१ भूवा ९१ हृत लब्धा ११ द्विस्था भू ९१ रूनयुता ८०।१०२ दलिता ४०।५१ जा
ते आबाधे स्वाबाधा भुजौ ४०।६८ द्वितीयस्थानेपि ५१।७५ अनयो स्वाबाधाभुजकृत्यो: १६००
४६२४ युत: २३०१।५६२५ अंतरस्य ३०२४ मूलं जात: किंचिन्न्यून: पंचपंचाशन्मितो लंब: ५५ क्षेत्र
दर्शनं अस्मादत्रेष्ट बाहुवर्णो नाल्प इति ज्ञापितं। उर्व्या: सकाशात् कर्णोधिका
नोक्तो एवमादि क्षेत्रस्थाने कर्णस्य कल्पन सुधिया सुज्ञेन कार्या। अत्रोपपत्ति:
अंकोपाळे अंकवोऽख्वे

119/2006
59

त्वाचार्यै रेव निकल्प्यते॥ तथाहि। अत्र चतुर्भुजे हि एकांतरकोणयोरान्नयनतः संकोच्यमानं त्रिभुजत्वमेति। तत्रैककोणजन्यलघुभुजयोरैक्यं भूमिरितरौ भुजौ। तदग्रे बाहूनतः संकोच्यमानः कर्णः कथंचिन्न स्यात्तदा तिरोभूमेरधिको न स्यादित्यर्थः॥ छ॥ अथ स्र - मोकक्षेत्रे इष्टोत्र कर्ण इत्यादिनोक्तेः फलानयनार्थमाह सूत्रं वृत्ताद्धं। अयस्येति। अयस्रे तु कर्णोभयतः स्थिते ये तयोः फलैक्यं फलमत्र तु तो॥ कर्णोभयतः स्थिते ये त्र्यस्रे तयोर्लंबगुणं भूम्यर्द्धमित्यादिना फले आनीय तदैक्यं यत्तदेवात्र वास्तवं फलं। अथ फलार्थं प्रागानीतस्य तस्यैव क्षेत्रस्य न्यासः

भूम्यर्द्धं ७७ लंबेन ६० गुणितं ४६२० छेदे नरहृतं २३१० जातं स्पष्टं प्रथमत्र्यस्रफलं २३१० पुनर्भूम्यर्द्धं ७७ लंबेन गुणं १८४८ छेदेनहृतं सज्जातं द्वितीयत्र्यस्रफलं ९२४ एवमनयोस्त्र्यस्रफलयोः २३१०। ९२४ रैक्यं जातं फलं ३२३४ छ
अथ समानलंबस्य चतुर्भुजक्षेत्रस्य कर्णानयनार्थं सूत्रं वृत्तद्वयेनाह॥ समानलंबस्येति आबाधयोनेति च॥ समानलंबस्य चतुर्भुजस्य मुखोनभूमिं परिकल्प्य भूमिं॥ भूजौ भुजौ त्र्यस्रवदेव साध्यौ तस्यावधे लंबमितिं ततश्च॥ छ॥ आबाधयोना चतुरस्रभूमीस्तद्वर्गयोर्यस्तवगैक्यपदं श्रुतिस्स्यात्॥ समानलंबे लघुदोः कुयोगान्मुखान्यदोः संयुतिरल्पिका स्यात्॥ छ॥ तुल्यलंबस्य चतुर्भुजक्षेत्रस्य मुखोनां भूमिं प्रकल्प्य भुजौ च भुजौ प्रकल्प्य त्र्यस्रवदेव नामा त्रि

भुजे भुजयोर्योग इत्यादिनावधे लंबमाने च साध्ये॥ च परं तत्रचतुरस्रभूमिराबाधयोनास्तिय छेषं तद्वर्गस्य लंबवर्गस्य च यदैक्यं तन्मूलं श्रवणः स्यात्॥ तत्र नियामकमाह॥ समानलंबेति। यदा लघुभुजमुखयोगात्सकाशान्मुखान्यदोः संयुतिर्न मुखमहद्भुजसंयोगोल्पः स्यात्॥ तदैव परोन्ये तुल्यलंबत्वं न स्यादित्यर्थः॥ यथाह सूर्यः॥ विषम चतुर्भुजे मुखकोणाभ्यां भूमिपर्यंतं लंबरेखे कृत्वा तत्राद्यंतयोस्त्र्यस्रद्वयं भवति॥ एवं मुखानाया भूमौ कृतायां त्र्यस्रद्वयमेवावशिष्यते तयोरैक्ये एकं त्रिभुजं भवति॥ तत्र लंबं स एव॥ अथ लंबोभयतो ये मुखं ऊने त्र्यस्रद्वये भूम्यौ स्यातां मत्तास्य भुजे भुजयोर्योग इति प्रकारेणाबाधालंबाः साधिताः॥ तत्राद्यबाधा प्रथमत्र्यस्रस्य भूमिः सा चेच्चतुरस्रभूमेः शोध्यते तर्हि आद्यत्र्यस्रोनलंबाद्यग्रतः क्षेत्रमवशिष्यते। उप लंबायाहिक्षिणमूलपर्यंतं कर्णरेखां कृत्वा पुनस्त्र्यस्रमुत्पन्नं तत्राबाधोना भुर्भुजः 60
कोटिस्तद्वर्गयोर्वर्गपदं कर्णो भवतीत्यात उक्तं॥ आबाधयोनेत्यादि॥ अथ समानलंबेति। अत्र समानलंबत्वं असमानलंबत्वं च भूमेर्बहुत्वे नाल्पत्वेन च भवति यतो भूमेरल्पत्वे महद्भुजऊर्ध्वभागेन यदा संकुचितां प्राप्नोति तदा तेन भूमिरधो निःसार्यते॥ अतस्तत्रान्यो लंबः पूर्वलंबरपि को भवति। अथ यदा भूमिरधिका स्यात्तदा तया महद्भुजास्ति यत्नेन यो निःसार्यते ऽतस्तत्रान्यो लंबः पूर्वलंबसमत्वं भवति॥ एवं समानलंबे मुखेरधिकत्वे न लघुभुजायां भूम्यर्द्धं तपर्यंतम॥

121
2006

धिकः प्रदेशस्तथा मुखान्महद्भुजाग्रपर्यंतमल्पप्रदेशो भवति एतदन्यथात्वे समलंबत्वाभावः स्यादित्युप
पन्नं॥६७॥ अथातुल्यलंबक्षेत्रोदाहरणपूर्वकं समलंबोदाहरणं सार्द्धानुष्टुप्छंदसाह॥ द्विपंचाशन्मि
ति॥ अतुल्यलंबकमीति॥ कर्णौ तत्रापराविति वा॥ द्विपंचाशन्मितन्येकचत्वारिंशन्मितौ भुजौ मुखं तु
पंचविंशत्या तुल्यं षष्ट्या मही कीला॥ अतुल्यलंबकं क्षेत्रमिदं पूर्वैरुदाहृतं षट्पंचाशाऽत्र षष्टि
श्च नियते कर्णयोर्मिति॥ कर्णौ तत्रापरौ ब्रूहि समलंबे च तत्कृतिं॥ यथा द्विपंचाशन्मिते कल्पना
दिंशन्मितौ भुजौ भवतः तु पुनर्मुखं पंचविंशत्या तुल्यं षष्ट्या महि समा स्यात्॥ एवंविधमीदृक्षे
त्रं पूर्वविबुधैरतुल्यलंबं समुदितं अथ पुनस्तत्रैव षट्पंचाशा ५६ त्रिषष्टिश्च कर्णयोर्नियते
मिति मानेस्यातां॥ तत्रापरौ कर्णौ ब्रूहि समलंबे लंबन्यासः

अत्र सव्यभु
जाग्रे दक्षिणभुजमूलपर्यंतं कल्पितेयं हि भुजमानं ६३ अथा ३९ तद्दृष्टोत्र कर्णः
अथ संप्रकल्प्यः त्र्यस्रे तु कर्णौ भियत इत्यादिना तद्भुजयनयोर्येत्र्य स्रे चोत्पन्न
तयोः कर्ण एव भूमिः ६३ भुजौ च २५। ५२ अतस्त्रिभुजे भुजयो योगः इत्या
दिना आबाधादिशाद्यते भुजयोः २५। ५२ योगः ७७ तदंतरेण गुणितः २०७९ भुवा ६३ तः लब्धे
न ३३ द्विस्था भूः ६३ स्तनयुता ३०। ९६ दलिता सति जाते आबाधे १५। ४८ पुनर्भूः ६३ भुजौ च ३९। ६०
तयोर्योगः ९९ तयोरेवांतरं २१ गुणा २०७९ भुवा ६३ हृतः लब्धा ३३ द्विस्था भूरूनयुता दलिता ५०

त जाते आबाधे १५। ४८ (स्तनेन) ततीय त्र्यस्रे भु ५। भुजौ ५२। ६० तयोर्युतिः ११२ भुजांतरं ८ गुणा ८९६ भुवा ५६ लब्धं १६ अनेन १६ स्था
नद्वये भूः ५६ रूनाढ्या ४०। ७२ अर्द्धिता जाते आबाधे २०। ३६ एवं पुनरप्याबाधा २०। ३६ अथ लंबानयनं॥ स्वाबाधा तदाश्रितो भुजश्च ४८। ५२
अनयोः कृत्यं ३३०४। २७०४ तदंतरं ६०० अस्य मूलं जातो लंबः २० पुनराबाधा जौ १५। ४८ आबाधा दोष्णोः कृत्योरंतरं १२९६ अस्य मूलं
जातो द्वितीयो लंबः ३६ लंबयोरेकत्र न्यासः २०। ३६ अथापरः कर्णः साध्यते आबाधयोरल्पकुस्पयोर्यदिति एकदिक्स्थयोराबा
धयोरंतरं तु शून्यं वर्णादिस्वं स्वमित्युक्ते स्याद्गोपि स्वतद्युतस्य लंबैक्य ५६ वर्गस्य ३१३६ पदं लंबैक्यमेव ५६ अयमेवापरः कर्णः एवं
क्षेत्रदर्शनं अथवा षट्पंचाशा त्स्थाने सव्यभुजा दक्षिणमूलपर्यंतं कल्पितेष्ट कर्णो द्वात्रिंशत् ३२ भूमिस्तु

सैव ३२ भुजौ च ६०। ५२ अस्मात् प्राग्वद्द्वितीयकर्णः यथा भुजयोगः ११२ तदंतरं ८ गुणा ८९६ भुवा ३२ हृ
तः २८ द्विस्था भूरूनयुता ४। ६० दलिता जाते आबाधे २। ३० आबाधा तदाश्रितो भुजश्च ३०। ६०
अनयोः कृतिः ९००। ३६०० विवरस्य २७०० मूलभावात्करणीगतो यं लंबः २७०० अपरस्त्र्यस्रे
भुजौ च ३२। ३९। २५ एभ्यः त्रिभुजे भुजयोरित्यादिना जाते आबाधे तत एव २। ३० स्वाबाधाभुजौ २। २५ आभ्यां प्राग्वल्लंबो
मूलाभावात्करणीगतः ६२१ स्वाबाधाभुजौ ३०। ३९ आभ्यामपि लंबः ६२१ अन्योन्याबाधा भुजौ २। ५२ आभ्यां प्राग्वल्लं
बः २७०० एवं जातं खंड द्वयं करणीगतं २७००। ६२१ तथा न्यास तन्मूलेन भाव्यं अस्यासन्नमूलानयनार्थं मुपायः
वर्गेण महतेष्टेन हताच्छेदांशयोर्वधात् इति प्रोक्तः यथांशच्छेदौ २७०० अनयोर्विधेयमेव अयं महतेष्टेन पंचविंशति २५ व
र्गेण ६२५ हत १६८७५०० एतन्मूलं १२९९ गुणपदस्थ च्छेदहृते गुणः ६२५ अस्य पदेन २५ गुणितोयाच्छेदच्छेदः २५
अनयागुणपदस्थ च्छेदः २५ एतद्भक्तः १२९९ लब्धं रूपाणि ५१ शेषं २४/२५ एवं निकटपदं ५१ अथ द्वितीयस्यास्या
पि ६२१ प्राग्वन्निकटपदं २४ २३/२५ एवमनयोः करणीगतयोः २७००। ६२१ निकटपदयो २४/२५ न्यासः ५१ २४/२५ २४ २३/२५

अनयोः समछित्त्योरैक्यं ७१/५ छेदांशयोः शेषे हृते लब्धं रूपं १ रूपेषु ५ युतं ७ शेषांशाः द्वाविंशतिः २२ एवं सिद्धे योः कर्णो ७/२२/२५

स्थूलं तु यथा लंबवर्गो २७/२५ ९०० अनयोरैक्यं २५२२ अस्य पदं ५/१० अथ तदेव क्षेत्रं यदा समलंबं चेत्तदा मुखे कोन

मिं परिकल्प्य जातं अस्य मुखं २४ अनेन भूः ३० वियुता सती ५/१० जाता अस्मिन् क्षेत्रे भूः ३४ अत्रापि लंबार्थं त्रिभुजे भु

जयोः ५२।३९ रित्यादिना दोर्युगस्यान्तरं तरगुणः ११८३ भुवा ३४ हृतो भागो न गच्छति अतो भूः छेदः एवं स्थितः ११८३/३४ अनेन हि

स्याः भूः ३४ समछिदा नगेच्छेदंशावपरतो ११८ ७१५ ऊनयुता ३ ३४४ दलिता जाते आबाधे ५/१० ३४४/१० द्वाभ्यामपवर्त्ति

ते ३/५ ७१२ अथ लंबज्ञानार्थं आबाधाभुजौ ३ ३९/५ अनयोः समः कृत्यंतरं ३८०७५/२५ अस्य मूलाभावात् करणीगतं एव लं

बः ३८०७५ अथ द्वितीयलंबार्थं आबाधाभुजौ ७१२ २५ अत्रापि जातः करणीगतं एव लंबः ३८०७५/२५ पूर्वसमः आपि प्राग्वद्वि

र्णि मेहते ने नेछेत्यादि पंचविंशतिवर्गमित इति संप्रकल्प्य जातमिदं मासन्नमूलं क्षेत्रे दर्शनं च

॥ अथ पकर्णानयनार्थं माबाधयोरैक्यपदं भूमिरित्यादि चतुरस्रक्षेत्रे भूमि ५० इयमाबाधा

३/५ समछिदोना २९५ अस्या वर्गः तल्लंबवर्गैक्यपदं नाम साचलंबचेतस्य बौ इति ५/१ योर्वर्गो न ५/१

योरैक्यपदं कर्णः स्यात्यदादीनां पूर्वपरामर्शकत्वात् तच्छुन्ना बाधोनाचतुरस्रभूमिरित्यर्थः॥

अथ स्वत्रगणितसंगतिः आबाधोनचतुरस्रभूमिः २९७/५ वर्गः ८८२०९/२५ लंबवर्गः ३८०७५/२५ अनयोरैक्यं १२६२८४/२५ स्य

छेदभक्ते लब्धं कर्णवर्गः ५०४९ एवं द्वितीयपक्षेपि ज्ञानयनार्थं समछिराद्वेन हृदाबाधो

७१२/५ नाचतुरस्रभूमिः १२८/५ तद्वर्गः १६३८४/२५ लंबवर्गश्च ३८०७५/२५ अनयोरैक्यं ५४४०० छेदहृतं संजातो द्वि/२५ तीयकर्णश्च २५ गीः २१७६ एवं कर्णं २१ योर्वर्गौ ५०४९।२१७६ २१॥

यनयोरासन्नमूलानयनार्थं पंचविंशतिवर्गमितहरेण संप्रकल्प्य मासन्न जातं विकरं मुखं

अ ७/२० अन्यं पंचविंशतिवर्गमितहरेण संप्रकल्प्य जातो विकरमूलं द्वितीयकर्णस्य ४३।३९ अवयवस्यामाह समानेति। समानलंबे चतुरस्रे लघुभुज ३२ कु ६० योगार्ध [illegible] मुखं ७/२५ २९

म४ मुखः परसंयुतिः ॥ इत्यादि स्यात् भवति नेष्टे ब बाहुव्यपरो चकर्णौ भवितव्यौ। पिं इदामपि इत्यपि विषये

लेपि नियतव कर्णानयनं महता प्रयासेना विहितमित्याह ॥ कर्णाश्रितेति॥ अथ गुणनप्र

कारं वक्ति॥ कर्णाश्रितभुजघातैक्यमुभयथान्योन्यभाजितगुणयेत्॥ योगेन भुजप्र

तिभुजवधयोः कर्णौ पदे विषमे॥१९॥ कर्णयोराश्रितौ ये बाहू तद्घातौ अन्योन्यं तत्र तत्र ते

क्यमन्योन्यभाजितं कृत्वा भुजप्रतिभुजघातयोगेन गुणयेत्। तयोः पदे मूले वि



षमचतुरस्रे कर्णौ भवतः एतदुदाहरणोस्प्रष्टं दृष्टव्यं। यथा मानन

धेन्यासः वैकौ कर्णे पश्च भूलंबे स्वान्तरे स्यात्तदा श्रितभुजौ २५।५२

यन्यौ तयोर्घातः १३०० तथा तस्यैव कर्णस्याश्रितावपरे बाहू ६०।३२

यन्योर्वधः २२५० वधयोर्योगो १३०० २२५० रैक्यं ३५५० यद्येवं

द्वितीयकर्णे स्वांश्रिताःतदा श्रितभुजौ ३२।२५ यन्योर्वधः ८०५। तथा कर्णाश्रिता

वपरो बाहू ५२।६० यनयोर्वधः ३१२० वधयोरैक्यं ४०२५। एवं वधैक्ये ३५५० ४०

२५ एते परस्परं विभज्य न्यस्ते यथा भुजप्रतिभुजौ ३९।५२ अनन्तरौ ३२।५२ यनयोर्वधः

२०२२ तथा पूर्वपश्चिम ४०९५ ३५४० | ३५४० ४०९५ यो भुजप्रतिभुजोः २५।३० अनयोर्घातः १५०० एवं भु
जप्रतिभुजवधो [redacted] २०२८।१५०० अनयोर्योगेन ३५२८ पूर्वागतावंको ४०९५ ३५४० | ३५४० ४०९५ संगु
णितौ [redacted] १४४९७१७० | १२८४९२० कौ तत्र ३२५२३१३ स्यातां द्वयेभुजे गुणि
ते जाता कर्णी ३।५४ | ३५४० | ४०९५ एवमत्रोपपत्तिर्येन ने छेदनागुरुत्वापि यां घातय
वः लघुमार्गियोपाय दर्शनद्वारा कर्णानयने सूत्रं वृत्तद्वयमाह ॥ इष्टाभिष्टजास्येति ॥ छ ॥
बाहू वर्धयतीय ॥ छ ॥ इष्टाभिष्टजास्यद्वयबाहुकोट्योः परस्परं कर्णाहता भुजा इति ।
चतुर्भुजं यद्विषमं प्रकल्पितं श्रुति तु तत्रापि भुजद्वयाते रो ॥ छ ॥ बाहोर्वधः कोटिवु
धेन युक्तस्यात् एका श्रुतिः कोटिभुजावधौ वा ॥ इत्यत्र घोसस पिसध नेस्मिन् पूर्वैः
इष्टं यद्वहुल भाविभ ॥ छ ॥ इष्टाभिष्टं यथेच्छं कल्पितं यज्जात्यं तस्य द्वयं तस्य बाहुको
ट्योरपि यत्कर्णहताः इतासंतो भुजाः भवंति स्वेन प्रकारेण यैबाहवस्तैर्विषमं प्रकल्
ल्पितं तस्मिन् चतुःकोणेश्रवणरेखयोः सजं यात्रि भुजेषु द्वयं तस्मात् कर्णी स्तः ॥
इष्टप्र स्तानायमाह ॥ बाहोरिति प्रथमं भुजयोर्घतः कोटिवधेन युक्तः सन्नेका
श्रुतिः स्यात् कोटिवधेन युक्तः सैका त ॥ इत्यथ मर्थः ॥ माकल्पितेये जात्यस्रे तेनत्र यथा
भुजयोः परस्परगुणने कार्यं तद्परस्परकोटिवधेन युक्तस्य कर्णः स्यात् ॥ इष्टयान्यो
न्यकोटिभुजवधेक्यं द्वितीयश्रवणः एवमिति प्रकारेण तेन घोप्रकारेण सस पि

साधे पूर्वैराचार्यैर्गुरुत्वतं यत्न भाविभः इति वक्तृत्वा सोपहासमिति ॥ छ ॥ त्यान
जात्यस्रद्वयं  इष्टयोर्भयबाहुकोट्योः ३।३२। ४।५ परस्परकर्णाभ्यां
१३।५९ ताः संव योज्जाता भुजाः ।३९।२०।५२।२५ तत्र महति भुः ५० लघु
घुतन्मुसं स्तरो ४ बाहुः ३९।५२ ॥ एते भुजौ । विषमे चतुर्भुजं कल्पि
तमिदं क्षेत्रं चकर्णरेखा भवयेतो प्रत्यस्रेन तः तस्माद्कजात्य

द्वयाद्विकोणतः श्रुतिस्तः ॥ ज्ञावेवाह । बाहोर्वध इति । बाहू १२।४
वधः ४८ । कोटि ३।५ वधेन १५ युक्तः जातः एकः कर्णः ६३ स एव कोटि
भुजा ३।१२ वधः ३६ पुनः कोटिभुजौ ४।५ इतरेतरवधः २० एवं वधयोः ३६।२०
ऐक्यं ५६ जातो द्वितीयः कर्णः ५६ ॥ छ ॥ सूचिक्षेत्रमाह ॥ इष्टकं यत्स्यनावे । चित्रेणो
दाहरणं वस्तद्वयं क्षेत्रे इति ॥ नत खंड इतिचयस्तत्राश्रुतिः ॥ एकाखास्व धनैः समा
नि । पिगुणे रन्या यतस्तं बेबंकौ तुल्यो गोधाति । भिस्त पाजि नधने पीगाच्छ्वा लं बयोः
छ ॥ तस्तै खंडे क पयाधरेश्रवणायो योगाच्च जंबावधास्त तस्तु । यो निजमार्गव
द्भुजयो योगेन यास्या ततः सा । बाधं च दलंबकं च भुजयोः सुत्याग मारोचके
सर्वे गणि । तिकमच द्वयानितरां क्षेत्रे च दसो । सिसिचतः ॥ छ ॥ भोः गणित । तिकगणि
तकुशल तत्र तत्सं चमेव हि । यास्मि क्षेत्रे दसो । सिचतः कुत्रे साह ॥ पत्रे । तस्य से

127 / 2006
63

धः भुः २०० मुखं १२५ बाहू तस्य त्रिभिः २५० शरा निधा तौ मिः १९५ स्तुसो कर्णौ २०० । ३१५ लंबौ
१९२ । २२४ अथ सर्वमिति यदुक्तं तदाह । ये चतुरस्रे त्रि तत्र कर्णो लंबसंपाता दधःखंडे
युयुतस्यर्धः तथा श्रवणयोर्योगात् लंब लंबौ भवत । आबाधा … पंचक पप स्वमार्गेण
दूयो भुजौ तयोर्योगे नयासुचे संमानां च वहि ततः तस्यास्सूत्राः सकाशात् सा बा
ध[illegible]मा बाधया सहितं लंबं वदेस धः भुयजयोः मुखाद्यमरितन महे शेष भुजयो
र्वंधि साक्षाचितु भुजयोः समाः एव वहि ॥ निजमार्गे क्षेत्र मुखाधिसकाशदे रोतिर्यक्
पार्श्वं द्वि गत तयोर्भुजयोर्योगेन क्षेत्र शिरसि । निम्ना गत्यं यमखुति सोर्ध सू । चितस भि
धिपते मधि कोपरि ततनतुभिः ॥ उपसंक्र ॥ धस्तन भूमिरिति संस्था ॥ एवम
नन्यान्यासः … अन्य तक्म्पना बाहुस्या उदाहरणमंतरेण सूत्र संगति नाव
बुध्येते ति हेतो … दाहिन उदाहरणे न उद्देशको ऽभिमायंय । किं भूस्त मत्करणस्
२८० मा मार्या छ पेत्ता … ह ॥ लंबतः शहाश्रित बाह्वोरिति ॥ छ ॥ तत्संधार्द्धं स्वर निच ।
छ ॥ लंबतु ह … । श्रित बाह्वो मध्यसंख्यारव्यमरव्य लंब … स्या ॥ संभूताभूः
-धं पिंडसाधौ … यस्यारध रंखंडम ॥ १ ॥ तत्संधि द्विस्यः परलंबश्रव
णाहतपरस्य पिंडेन । भक्तो लंबयुसो योगास्या नामधःखंड ॥ २ ॥ लंब श्रुत हाश्रि
तबाहुश्रुतयोर्यन्मध्यमंतरं तदस्य संख्यास्व्यं संधि [illegible] । भिधानं यस्येत 53

सौबाधबाधे स धः अख्या ॥ भिनंसंस्थाया हौ हा वहा कया ॥ भिधास्मता ॥ अथ संख्या भूपि
इसे वहहा बाधा ॥ एवं यस्य लंबस्याधर खंडस्याख्या साधा निय मस्ति तत्संधेर्द्विस्य 129
कार्य्यः स्य च परलंबश्रवणहतः एकत्र परलंबगुणोपमे रे श्रवण … सर्धः उभयत्र य 2006
स्य रपिंडे न भक्तः सन् लंब श्रवण योगाद धः खंडस्यात ॥ अथोद्दिष्ट सूत्रावतारः यथा
लंब १२८ तद्दाश्रित भुज १२५ वर्गयो ३५७२३ । ३२०२५ यदं बाहुः स एव संधि संज्ञः ४२
अस्य लंबस्य सौबाधाबाधा ४२ अनया भूमिः ३०० रूना जातामहस्याबाधा २५२ तदेव
पिंडमभिधियते ॥ एवं द्वितीयलंबः कोटिः २२४ तदाश्रित बाहुः श्रुतिरूपः २६० अनयोर्व 64
र्गौ ५०१७६ । ६७६०० तरस्य १७४२४ पदं १३२ अनयोर्भेव संधिः १३२ आबाधापि च ॥ एत १३२
रै हीना भूः जातं द्वितीय पिंडं ७८ रहा बाधोपलक्षितं १६८ अथ साध्यपसेति ॥ आ
– घे लंबस्याधरखंडसाध्यते तः अघ लंब संधिरयं ४२ द्विस्यः क्रमेण परलंब श्रवण
भ्याः २२४ । २६० हतः १०७५२ । १२४८० स्यानद्वयेपि परस्य पिंडे ७८ न भक्तः लब्धं खं
डद्वयं तयोः लं बाधःखंड १३४ करणाधःखंड १६० एवमेव द्वितीय लंबस्य संधिः १३२
स्यानद्वये क्रमेण परलंब १९२ श्रवण भ्यां ३१५ हतः २४०४८ । ४१५८० भय यत्र पर
पिंडे २५२ न भक्तः सन् लब्धे खंडे तत्र लंबाधःखंड ९९ कर्णाध श्र १६५ अचोपपत्तिः ॥
।विषम चतुर्भुजे क्षेत्रे लंबयो बहिरा घंतयोस [illegible] स्व क्षेत्रे भवतः तत्र लंबः को

दि लंबा॥ अितो भुजश्च कर्णः तयोर्वर्गांतरपदं तस्यैव भुजः स्यात् स च लघ्वाबाधारूपस्त
स्यैव संधि रिति संज्ञा सुतरां ॥ अथ पतद्धूनाभूर्महत्याबाधा तस्याः पिंडमिति संज्ञा भिधानं सुतरां ॥
अथ लंबकर्णसंपातादधः खंडज्ञानाय तनार्थमनुपातः यदि परठमिते भुजे परलंबः
कोटिस्तदैष्टसंधिमिते भुजे का मिते॥२५।२।११९।१३२॥ अत्र परलंबगुणितस्य संधेः
परदैर्घ्यपिंडेन भागे हृते लंबाधःखंडमिता कोटिर्लभ्यते॥ अत्र लंबाग्रात् भूज्ञान
पर्यंतं कर्णः ॥ अस्ति तथा लंबमूलाद्भुजमूलपर्यंतं पिंडमाभ्यसेत भुजः लंबैकदेश कोटि
रा सेन हृपि अत्र सुमनं॥ अथोपपत्तिः पीठा मिते भुजे विशिष्टकर्णः कर्णस्तदैष्ट
संधिमिते किमिति से वा पिमाणव तु अस्य समुत्सनं॥ अथा च संध्यस पस था पिंडस्या
